❀ अथ ❀

श्रावणी विधि

[ऋषि तर्पणी नेपाली टीका समेत]

प्रकाशक

गोर्खा पुस्तक एजेन्सी

जंगमबाड़ी, वाराणसी ।

[२०३१ वि०]

मूल्य [illegible]

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ

श्रावणी-विधिः

[श्रावणीस्नानविधि–यज्ञोपवीतमन्त्रणविधि–उपाकर्मविधिसहितः]

(जनैपूर्णिमामा न्वाहुने-जनै मन्त्रने र उपाकर्मविधिसमेत भएको)

सम्पादक:

"एकदेव उपाध्याय"

प्रकाशक

गोर्खा पुस्तक एजेन्सी

जंगमबाड़ी, वाराणसी (यू० पी०)

Rs 5/80

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रकाशकः—

गोर्खा पुस्तक एजेन्सी

जंगमवाड़ी वाराणसी ।

सम्पादक—एकदेव उपाध्याय

संस्करणः प्रथम

संवतः २०३४ | मूल्यः ३.६० —सा—रु.०

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

संवत् २०२४ मूल्य:

अथ श्रावणी-विधिः

[1]संक्रान्तौ ग्रहणे चैव सूतके मृतकेऽपि वा ।
गणस्नानं न कुर्वीत नारदस्य वचो यथा ॥

---

१. संक्रान्तिमा ग्रहणमा सूतकमा जूठोमा गणस्नान नगर्नू भन्ने नारदको वचन छ ॥ (यसै कारण यस्तो परे नागपञ्चमीमा गर्छन् ।)

श्रावणको पूर्णिमादि कालमा बिहानको स्नानसंध्यादि नित्यकर्म सकेर गुरु—शिष्यहरूका साथ गाउँदेखि बाहिर पूर्व या उत्तर दिशामा अथवा नदी वा स्वच्छ पोखरीमा गएर त्यसको तीरमा सेतो वा जहाँ जस्तो पाइन्छ त्यस्तै माटो, गिलो गोबर, भस्म, कुश, तिल, अक्षता, ताजा सुन्दर फूल, दूबो, अपामार्ग आदि सबै स्नानका सामान जुटाएर पूर्वमुख वा उत्तरमुखका गुरु-पवित्र धारेर शौचादि कार्य सकेका कुश हातमा लिएका शिष्यहरूका साथ देश-काल आदि हालेर सबैका साथ संकल्प गरून् । जस्तै-आचमन गरेर प्राणयामगरेर—गणेश आदिलाई नमस्कार गर्न —॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तत्र श्रावणस्य पूर्णिमादिकाले प्रातः स्नानसन्ध्यादिनित्यकर्म विधाय गुरुः शिष्यगणैः सह ग्रामाद्बहिः प्राच्यामुदीच्यां वा नद्यादि रम्यं जलाशयं गत्वा तत्तीरे शुभ्रां यथादेशसम्भवां वा मृदम्, आर्द्रं गोमयं, भस्म, कुशान्, तिलाक्षतान्, सुरभीणि पुष्पाणि, दूर्वाङ्कुरापामार्गादिसर्वां स्नानसामग्रीं सम्पाद्य प्राङ्मुख उदङ्मुखो वा सपवित्रकरो गुरुः शौचादियुक्तैः कुशहस्तैः शिष्यैः सह देशकालौ सङ्कीर्त्य सर्वैः सह सङ्कल्पं कुर्यात्। यथा--आचम्य प्राणानायम्य ॥

श्री- श्रीमन्महागणाधिपतये नमः। श्रीगुरुभ्यो नमः। श्रीसरस्वत्यै नमः। वेदाय नमः। वेदपुरुषाय नमः। इष्टदेवताभ्यो नमः। कुलदेवताभ्यो नमः। ग्रामदेवताभ्यो नमः। स्थानदेवताभ्यो नमः। वास्तुदेवताभ्यो नमः। एतत्कर्मप्रधानदेवताभ्यो नमः। सर्वेभ्यो देवेभ्यो नमः। सर्वेभ्यो ब्राह्मणेभ्यो नमः। अविघ्नमस्तु।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः । लम्बोदरश्च विकटो विघ्ननाशो गणाधिपः । धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः । द्वादशैतानि नामानि यः पठेच्छृणुयादपि । विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा । संग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते । शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥ अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः । सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥ सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके । शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥ वक्रतुण्ड महाकाय सूर्यकोटिसमप्रभ । निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥ वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे । यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥ गणनाथं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नमस्कृत्य नमस्कृत्य पितामहम् । विष्णुं रुद्रं श्रियं देवीं वन्दे भक्त्या सरस्वतीम् ॥ स्थानं क्षेत्रं नमस्कृत्य दिननाथं निशाकरम् । धरणीगर्भसंभूतं शशिपुत्रं बृहस्पतिम् ॥ दैत्याचार्यं नमस्कृत्य सूर्यपुत्रं शनैश्चरम् । राहुं केतुं नमस्कृत्य यज्ञारम्भे विशेषतः ॥ शक्रादिदेवताः सर्वानृषींश्चैव तपोधनान् । गर्गं मुनिं नमस्कृत्य पर्वतं नारदं तथा ॥ वसिष्ठं मुनिशार्दूलं विश्वामित्रं च गोभिलम् । अगस्त्यं च पुलस्त्यं च दक्षमित्रं पराशरम् । भरद्वाजं च माण्डव्यं याज्ञवल्कं च गालवम् । अन्ये विप्रास्तपोयुक्ता वेदशास्त्रविचक्षणाः ॥ तान् सर्वान् प्रणिपत्याऽहं शुभं कर्म समारभे ॥ लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः । येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥ अग्रतः श्रीनृसिंहश्च पृष्ठतो देवकीसुतः । रक्षतां पार्श्वयोर्देवौ भ्रातरौ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रामलक्ष्मणौ । अथ संकल्पः कुशयवतिलजलान्यादाय —ॐ स्वस्ति श्रीमुकुन्दसच्चिदानन्दस्य ब्रह्मणोऽनिर्वाच्यमायाशक्तिविजृम्भिताविद्यायोगात् कालकर्मस्वभावाविर्भूतमहत्तत्त्वोदिताहङ्कारोद्भूतवियदादिपञ्चमहाभूतेन्द्रियदेवतानिर्मितेऽण्डकटाहे चतुर्दशलोकात्मके लीलया तन्मध्यवर्तिभगवतः श्रीनारायणस्य नाभिकमलोद्भूतसकललोकपितामहस्य ब्रह्मणः सृष्टिं कुर्वतस्तदुद्धरणाय प्रजापतिप्रार्थितस्य समस्तजगदुत्पत्तिस्थितिलयकारणस्य जगद्रक्षाशिक्षाविचक्षणस्य प्रणतपारिजातस्य अच्युतानन्तवीर्यस्य श्रीमद्भगवतो महापुरुषस्य अचिन्त्यापरिमितशक्त्या ध्येयमानस्य महाजलौघमध्ये परिभ्रममाणानामनेककोटिब्रह्माण्डानामेकतमेऽव्यक्तमहदहङ्कारपृथिव्यप्तेजोवाय्वाकाशाद्यावरणैरावृते अस्मिन् महति ब्रह्माण्डखण्डे आधारशक्तिश्रीमदादिवाराहदंष्ट्राग्रविराजिते

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कूर्मानन्तवासुकितक्षककुलिककर्कोटकपद्ममहापद्मशंखाद्यष्टमहानागै-
र्ध्रियमाणे ऐरावतपुण्डरीकवामनकुमुदाञ्जनपुष्पदन्तसार्वभौमसुप्रती-
काष्टदिग्गजप्रतिष्ठितानामतलवितलसुतलतलातलरसातलमहातल-
पाताललोकानामुपरिभागे भूर्लोकभुवर्लोकस्वर्लोकमहर्लोकजनलो-
कतपोलोकसत्यलोकाख्यसप्तलोकानामधोभागे चक्रवालशैलमहाव-
लयनागमध्यवर्तिनो महाकालमहाफणिराजशेषस्य सहस्रफणानां
मणिमण्डलमण्डिते दिग्दन्तिशुण्डोत्तम्भिते अमरावत्यशोकवती
भोगवती सिद्धवती गान्धर्ववती काञ्च्यवन्त्यलकावती यशोवतीति
पुण्यपुरीप्रतिष्ठिते इन्द्राग्नियमनिरृतिवरुणवायुकुबेरेशानाष्टदि-
क्पालप्रतिष्ठिते धरध्रुवाधरसोमपाप्रभञ्जनानलप्रत्यूषप्रभासाख्याष्ट-
वसुभिर्विराजिते हरत्र्यम्बकरुद्रमृगव्याधापराजितकपालीभैरवशम्भु-
कपर्दिवृषाकपिबटुरूपाख्यैकादशरुद्रैः संशोभिते रुद्रोपेन्द्रसवितृधा-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तृत्वष्ट्र्यमेन्द्रेशानभगमित्रपूषाख्यद्वादशादित्यप्रकाशिते यमनिय-
मासनप्राणायामप्रत्याहारधारणाध्यानसमाध्यष्टाङ्गनिरतवसिष्ठवाल---
खिल्यविश्वामित्रदक्षकात्यायनकौण्डिन्यगौतमाङ्गिरसपाराशर्यव्यास-
वाल्मीकशुकशौनकभरद्वाजसनकसनन्दनसनातनसनत्कुमारनारदा–
दिमुख्यमुनिभिः पवित्रिते लोकालोकाचलवलयिने लवणेक्षुरस-
सुरासर्पिर्दधिक्षीरोदकयुक्तसप्तार्णवपरिवृते जम्बूप्लक्षशाल्मलिकुश-
क्रौञ्चशाकपुष्कराख्यसप्तद्वीपयुते इन्द्रकांस्यताम्रगभस्तिनाग-
सौम्यगन्धर्वचारणभारतेतिनवखण्डमण्डिते सुवर्णगिरिकर्णिकोपेत-
महासरोरुहाकारपञ्चाशत्कोटियोजनविस्तीर्णभूमण्डले अयोध्या
मथुरा माया काशी काञ्च्यवन्तिका द्वारावतीति सप्तपुरीप्रतिष्ठिते
महामुक्तिप्रदस्थले शालग्रामशम्भलनन्दिग्रामेति ग्रामत्रयविराजिते
चम्पकारण्यबदरिकारण्यदण्डकारण्यार्बुदारण्यधर्मारण्य—पद्मारण्य-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गुह्यारण्यजम्बुकारण्यविन्ध्यारण्यद्राक्षारण्यनहुषारण्यकाम्यकारण्य-द्वैतारण्यनैमिषारण्यादीनां मध्ये सुमेरुनिषधकूटशुभ्रकूटश्रीकूट-हेमकूटरजतकूटचित्रकूटत्रिकूटकिष्किन्धश्वेताद्रिकूटहिमविन्ध्याचला-नां हरिवर्षकिम्पुरुषवर्षयोश्च दक्षिणे नवसहस्रयोजनविस्तीर्णे भरतखण्डे मलयाचलसह्याचलविन्ध्याचलानामुत्तरेण स्वर्णप्रस्थचण्ड-प्रस्थसूक्तिकञ्चावन्तकरमणकमहारमणकपाञ्चजन्यसिंहल-लंका–शोकव-त्यलकावतीसिद्धवतीगन्धर्ववत्यादिपुण्यपुरीविराजिते नवखण्डोपद्वी-पमण्डिते दक्षिणावस्थितरेणुकाद्धयसूकरकाशीकाञ्चीकालिकालवटे-श्वरकालञ्जरमहाकालेतिनवोखरयुते द्वादशज्योतिर्लिंगगंगा (भागीरथी) गोदा (गौतमी) क्षिप्रायमुनासरस्वतीनर्मदातापीप-योष्णीचन्द्रभागाकावेरीमन्दाकिनीप्रवराकृष्णावेण्याभीमरथीतुंगभद्रा-मलापहाकृतमालाताम्रपर्णीविशालाक्षीवञ्जुलाचर्मण्वतीवेत्रवतीभो-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गावतीविशोकाकौशिकीगण्डकीवासिष्ठीप्रमदाविश्वामित्रीफल्गुनीचित्र-
काश्यपीसरयूसर्वपापहारिणीकरतोयाप्रणीतावज्रावक्रगामिनीसुवर्ण-
रेखाशोणाभवनाशिनीशीघ्रगाकुशवर्तिनीब्रह्मानन्दामहितनयेत्यनेक-
पुण्यनदीभिर्विलसिते ब्रह्मपुत्रसिन्धुनदादिपरमपवित्र जलविराजिते
हिमवन्मेरुगोवर्धनक्रौञ्चचित्रकूटहेमकूटमहेन्द्रमलयसह्ये न्द्रकीलपारि--
यात्राद्यनेकपर्वतसमन्विते मतंगमाल्यकिष्किन्धऋष्यशृ गेतिमहानग-
समन्विते अंगबंगकलिंगकाश्मीरकाम्बोजसौवीरसौराष्ट्रमहाराष्ट्रमग-
धनेपालकेरलचोलपाञ्चालगौडमालवमलयसिंहलद्रविडकर्नाटक---
ललाटकरहाटवरहाटपानाटपाण्ड्यनिषधमागधआन्ध्रदशार्णवभोज--
कुरुगान्धारविदर्भविदेहबाह्लीकबर्बरकैकेयकोसलविराटशूरसेनकोंकण-
कैकटमत्स्यमद्रपारसिकखर्जूरयावनम्लेच्छजालन्धरेतिसिद्धवत्यन्यदेश-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विशेषभाषाभूमिपालविचित्रिते इलावृतकुरुभद्राश्वकेतुमालकिम्पुरुष-रमणकहिरण्मयादिनववर्षाणां मध्ये भरतखण्डे बकुलचम्पकपाटलाब्ज-पुन्नागजातिकरबीररसालकह्लारकेतक्यादिनानाविधकुसुमस्तबकविराजिते कोकन्तहिरण्यशृंग-कुब्जाबुर्दमणिकर्णीवटशालग्रामसूकरमथुरा-गयानिष्क्रमणलोहार्गलपोतस्वामिप्रभासबदरीतिचतुर्दशगुह्यविलसिते जम्बुद्वीप-कुरुक्षेत्रादिसमभूमध्यरेखायाः पूर्वदिग्भागे कुलमेरोर्दक्षिण दिग्भागे विन्ध्यस्य उत्तरे देशे श्रीशैलस्येशानदेशे शारदा-मेच्योर्वा सिंध-गंगासागरयोर्मध्ये मत्स्यकूर्मवराहनृसिंहवामनपरशुरामरामकृष्ण-बुद्धकल्कीतिदशावताराणां मध्ये बौद्धावतारे गंगादिसरिद्भिः पाविते, एवं नवसहस्रयोजनविस्तीर्णभारतवर्षे निखिलजनपावनपरमभाग वतोत्तमशौनकादिनिवासिते नैमिषारण्ये आर्यावर्तान्तर्गतब्रह्मावर्तैक देशे सूर्यान्वयभूभृत्प्रतिष्ठिते श्रीमन्नारायणनाभिकमलोद्भूतसकल

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रावणी-विधिः

जगत्स्रष्टुः परार्धद्वयजीविनो ब्रह्मणो द्वितीये परार्धे एकपञ्चाशत्तमे वर्षे प्रथममासे प्रथमपक्षे प्रथमदिवसे अह्नो द्वितीये यामे तृतीये मुहूर्ते रथन्तरादिद्वात्रिंशत्कल्पानां मध्ये अष्टमे श्वेतवाराहकल्पे स्वायम्भुवादि-मन्वन्तराणां मध्ये सप्तमे वैवस्वतमन्वन्तरे कृतत्रेताद्वापरकलिसंज्ञकानां चतुर्णां युगानां मध्ये वर्तमाने अष्टाविंशतितमे कलियुगे तत्प्रथमे विभागे (पादे) श्रीमन्नृपतिविक्रमाकांत श्रीमन्नृपतिशालिवाहनाद्वा यथासंख्यागमेन चान्द्रसावनसौरनाक्षत्रादिप्रकारेणागतानां प्रभवा-दिषष्टिसंवत्सराणां मध्ये अमुकनाम्नि सम्वत्सरे उत्तरगोलावलम्बिनि श्रीमार्तण्डमण्डले अमुकर्तौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकयोगे अमुककरणे अमुकराशिस्थिते चन्द्रे अमुकस्थे सूर्ये अमुकस्थिते देवगुरौ शेषेषु ग्रहेषु यथायथास्थान स्थितेषु सत्सु एवं गुणविशेषेण विशिष्टायां शुभपुण्यतिथौ अमुक-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गोत्रस्य अमुकप्रवरस्य अमुकशर्मणो मम इह जन्मनि जन्मान्तरे वा बाल्ययौवनवार्धक्यावस्थासु वाक्पाणिपादपायूपस्थघ्राणरसनाचक्षुःस्पर्शनश्रोत्रमनोभिश्चरितज्ञाताज्ञातकामाकाममहापातकोपपातकादिसञ्चितानां पापानां ब्रह्महननसुरापानसुवर्णस्तेयगुरुतल्पगमनतत्संसर्गरूपमहापातकानां बुद्धिपूर्वकाणां मनोवाक्कायकृतानां बहुकालाभ्यस्तानां उपपादकानां च पृष्टास्पृष्टसङ्करीकरणमलिनीकरणापात्रीकरणजातिभ्रंशकरणविहिताकरणकर्मलोपजनितानां रसविक्रयकन्याविक्रयहयविक्रयगोविक्रयखरोष्ट्रविक्रयदासीविक्रयाजादिपशुविक्रयस्वगृहविक्रयनीलीविक्रयाक्रेयविक्रयपण्यविक्रयजलचरादिजन्तुविक्रयस्थलचरादिविक्रयखेचरादिविक्रयसम्भूतानां निरर्थकवृक्षच्छेदनऋणानपाकरणब्रह्मस्वापहरणदेवस्वापहरणराजस्वापहरणपरद्रव्यापहरणतैलादिद्रव्यापहरणफलादिहरणलोहादिहर–

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

णनानावस्तुहरणरूपाणां ब्राह्मणनिन्दागुरुनिन्दावेदनिन्दाशास्त्रनिन्दापरनिन्दाभक्ष्यभक्षणाभोज्यभोजनाचोष्यचोषणालेह्यलेहनापेयपानास्पृश्यस्पर्शनाश्राव्यश्रवणाहिंस्यहिंसनावन्द्यवन्दनाचिन्त्यचिन्तनायाज्ययाजनापूज्यपूजनरूपाणां मातृपितृतिरस्कारस्त्रीपुरुषप्रीतिभेदनपरस्त्रीगमनविधवागमनवेश्यागमनदासीगमनचाण्डालादिहीनजातिगमनगुदगमनरजस्वलागमनपश्वादिगमनरूपाणां कूटसाक्षित्वपैशुन्यवादमिथ्यापवादम्लेच्छसंभाषणब्रह्मद्वेषकरणब्रह्मवृत्तिहरणवृत्तिछेदनपरवृत्तिहरणरूपाणां मित्रवञ्चनगुरुवञ्चनस्वामिवञ्चनासत्यभाषणगर्भपातनपथिताम्बूलचर्वणहीनजातिसेवनपरान्नभोजनगणान्नभोजनलशुनपलाण्डुगृञ्जनभक्षणतालवृक्षफलभक्षणोच्छिष्टभक्षणमार्जारोच्छिष्टभक्षणपर्युषितान्नभक्षणरूपाणां पङ्क्तिभेदकरणभ्रूणहिंसापशुहिंसाबालहिं-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

साद्यनेकहिंसोद्भूतानां शौचत्यागस्नानत्यागसन्ध्यात्यागौपासनाग्नि-त्यागवैश्वदेवत्यागरूपाणां निषिद्धाचरणकुग्रामवासब्रह्मद्रोहगुरुद्रोहपि-तृमातृद्रोहपरद्रोहपरनिन्दात्मस्तुतिदुष्टप्रतिग्रहदुर्जनसंसर्गरूपाणां गोया-नवृषभयानमहिषीयानगर्दभयानोष्ट्रयानाजयानभृत्याभरणस्वग्रामत्या-गगोत्रत्यागकुलत्यागदूरस्थमन्त्रणविश्राशाभेदनावन्दिताशीर्वादग्रहण-पतितसम्भाषणरूपाणां पतितजनपङ्क्तिभोजनाहःसङ्गमवृथामनोरथादिपा पानांतथा-महापापोपपापाभ्यां नाना योनिषु यत्कृतम् बालभावेन यत्पापं क्षुत्तृडर्थे च यत् कृतम्॥ "आत्मार्थं चैव यत्पापं परार्थे चैव यत् कृतम्। तीर्थेषु चैव यत् पापं गुर्ववज्ञा कृतं च यत्" रागद्वेषादिजनितं कामक्रोधेन यत् कृतम्। हिंसानिद्रादिजं पापं भेददृष्ट्या च यन्मया॥ देहाभिमानजं पापं सर्वदा यन्मया कृतम्। भूतं भव्यं च यत् पापं भविष्यं चैव गौतमि!

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शुष्कमार्द्रं च यत् पापं जानताऽजानताकृतम् । महल्लघु च यत् पापं तन्मे नाशय जाह्नवि ॥ ब्रह्महा मद्यपः स्तेयी तथैव गुरुतल्पगः । महापापानि चत्वारि तत्संसर्गी तु पञ्चमः ॥ अतिपातकमन्यच्च तन्न्यूनमुपपातकम् । गोवधो व्रात्यता स्तेयं ऋणानां चानपक्रियाः ॥ अनाहिताग्निता पण्य-विक्रयः परिवेदनम् ॥ इन्धानार्थे द्रुमच्छेदः स्त्रीहिंसौषधिजीवनम् ॥ हिंसा-यात्राविधानं च भृतकाध्यापनं तथा । प्रथमाश्रममारभ्य यत्किञ्चित् किल्बिषं कृतम् ॥ कृमिकीटादिहननं यत्किञ्चित् प्राणिहिंसनम् । माता-पित्रोरशुश्रूषा तद्वाक्याकरणं तथा ॥ अपूज्यपूजनं चैव पूज्यानां च व्यति-क्रमः । अनाश्रमस्थताग्न्यादिदेवाशुश्रूषणं तथा ॥ परकार्यापहरणं परद्रव्यो-पजीवनम् । ततो ज्ञानकृतं वापि कायिकं वाचिकं तथा ॥ मानसं त्रिविधं पापं प्रायश्चित्तैरनाशितम् । तस्मादशेषपापेभ्यस्त्राहि त्रैलोक्यपावनि ॥ निष्पा-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पोऽस्म्यधुना देवि प्रसादात् तव नान्यथा ॥ इत्यादि प्रकीर्णपातकानाम् एतत्कालपर्यन्तं सञ्चितानां लघुस्थूलसूक्ष्माणां च निःशेषपरिहारार्थं दशावरान् दशपरान् आत्मना सहितान् एकविंशतिपुरुषानुद्धर्तुं ब्रह्मलोकावधिपञ्चाशत्कोटियोजनविस्तीर्णेऽस्मिन्भूमण्डले सप्तर्षिमण्डलपर्यन्तं बालुकाभिः कृतराशेः वर्षसहस्रावसाने एकैकबालुकापकर्षक्रमेण सर्वराश्यपकर्षसंमितकालपर्यन्तं ब्रह्मलोके ब्रह्मसायुज्यताप्राप्त्यर्थं कुरुक्षेत्रादिसर्वतीर्थेषु स्नानपूर्वकं सहस्रगोदानजन्यफलप्राप्त्यर्थं तथा मम समस्तपितॄणां आत्मनश्च विष्ण्वादिलोकप्राप्तये अधीतानां अध्येष्यमाणानां चाध्यायानां स्थापनविच्छेदक्रोशघोषणदन्तविवृतिदुर्घृं तद्द्रुतोच्चारितवर्णानां पूर्वसवर्णानां गलोपलम्बितविवृतोच्चारितवर्णानां श्लिष्टास्पष्टवर्णविघट्टनादिभिः पठितानां श्रुतीनां यद्यातयामत्वं तत्परिहारार्थम् अष्टत्रिंशदनध्यायाध्ययने रथ्यासञ्चरतः शूद्रस्य शृण्वतोऽ-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ध्ययने म्लेच्छान्त्यजादेः शृण्वतोऽध्ययने अशुचिदेशेऽध्ययने आत्मनोऽशुचित्वेऽध्ययने अक्षरस्वरानुस्वारपदच्छेदकण्डिकाव्यञ्जनह्रस्वदीर्घप्लुतकण्ठतालुमूर्धन्योष्ठ्यदन्त्यनासिकानुनासिकरेफजिह्वामूलीयोपध्मानीयोदात्तानुदात्तस्वरितादीनां व्यत्ययेनोच्चारे माधुर्याक्षरव्यक्तिहीनत्वाद्यनेकप्रत्यवायपरिहारकपूर्वकं सर्वस्य वेदस्य सवीर्यत्वसम्पादनद्वारा यथावत्फलप्राप्त्यर्थं श्रीपरमेश्वरप्रीत्यर्थं देवब्राह्मणसवितृसूर्यनारायणसन्निधौ गंगाभागीरथ्यां अमुकतीर्थे वा प्रवाहाभिमुखं गणस्नानमहं करिष्ये ॥ [२] इति सङ्कल्प्य गुरुः शिष्यैः सह 'उभाकवी' इत्युच्चैः पठेत् । तद्यथा-ॐ उभाकवीयुवा यो नो धर्मः परापतत् । परिसख्यानि धर्मिणो विसख्यानि विसृजामहे ॥ [३] इति मन्त्रं पठित्वा यथाक्रमेण सर्वे गुरोरभिवादनं

२. यो संकल्प पढ़िसकेर गुरु शिष्यहरूका साथ 'उभाकवी' भन्ने मन्त्र उच्चा स्वरले पढ़ोस्-जस्तै–

३. यो मन्त्र पढ़िसकेर सबैले गुरुको अभिवादन गर्नू । अनि स्नानका लागि प्रार्थना गर्नू—"

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कुर्युः। ततः स्नानानुज्ञां प्रार्थयेत् ॥ यथा-नमोऽस्तु देवदेवाय शितिकण्ठाय वेधसे। रुद्राय चापहस्ताय दण्डिने चक्रिणे नमः॥ सरस्वती च गायत्री देवमाता गरीयसी। सन्निधात्री भव त्वं च सर्वपापप्रणाशिनी॥ यद्वा सागरनिर्घोषदण्डहस्तासुरान्तक। जगत्स्रष्टर्जगन्मित्र नमामि त्वां सुरान्तक॥ तीक्ष्णदंष्ट्र महाकाय कल्पान्तदहनोपम। भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि॥ नमामि गङ्गे तव पादपङ्कजं, सुरासुरैर्वन्दितदिव्यरूपम्। भुक्तिं च मुक्तिं च ददासि नित्यम्, भावानुसारेण सदा नराणाम्॥ उत्तिष्ठन्तु महाभूता ये भूता भूमिवासिनः। भूतानामविरोधेन स्नानकर्म समारभे॥ अपसर्पन्तु ते भूता ये भूतास्तीर्थदूषकाः। ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया॥ पुष्कराद्यानि तीर्थानि गङ्गाद्याः सरितस्तथा। आगच्छन्तु पवित्राणि स्नानकाले सदा मम॥ अपामधिपतिस्त्वं च तीर्थेषु वसतिस्तव। वरुणाय नमस्तुभ्यं स्नानानुज्ञां प्रयच्छ मे॥ अधिष्ठात्र्यश्च तीर्थानां

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वसतिस्तव । वरुणाय नमस्तेभ्य स्नानाज्ञां प्रयच्छ मे ॥ अधिष्ठात्र्यश्च तीर्थानि

तीर्थेषु विचरन्ति या । देवतास्ताः प्रयच्छन्तु स्नानाज्ञां मम सर्वदा ॥ गङ्गे च यमुने चैव गोदावरि सरस्वति । नर्मदे सिन्धो कावेरि जलेऽस्मिन् सन्निधिं कुरु ॥ [४] ततस्तीर्थाभिमन्त्रणम्–ॐ उरु ठं० हि राजा वरुणश्च-कार सूर्य्याय पन्थामन्वेत वा ऽ उ । अपदे पादा प्रतिधातवे करुतापवक्ता हृदया विधश्चित् । नमो वरुणायाभिष्ठितो वरुणस्य पाशः ॥१॥ इति मन्त्रेण न्युब्जाञ्जलिहस्तेन तोयमभिमन्त्रयेत् ॥ [५] जलावर्तनम्–ॐ ये ते शतं वरुणं ये सहस्रं यज्ञियाः पाशा वितता महान्तः । तेभिर्नोऽद्य सवितो विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः ॥२॥ इति मन्त्रेण जलं दक्षिणहस्ताङ्गुलिभिर्दक्षिणावर्तं त्रिवारमावर्तयेत् (भ्रामयेत्) ॥

४. तब घोप्टो अञ्जलिले तीर्थजललाई निमन्त्रण गर्नू—

५. तीर्थजलमा दाहिने हातको औंलाले दाहिनेतिरबाट तीनपल्ट घुमाउनू—

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

[६] पूर्णाञ्जलिनाऽऽपोग्रहणम् —ॐ सुमित्रिया नऽ आपऽ ओषधयः सन्तु ॥३॥ [७]तीर्थतटे जलप्रक्षेपणम् --दुर्मित्रियास्तस्मै सन्तु योस्मान्द्वेष्टि यञ्च व्वयन्द्विष्मः ॥४॥ [८] मृत्तिकालेपनम् --ॐ इदं व्विष्णुर्व्विचक्रमे त्रेधा निदधे पदम् ॥ समूढमस्य पा ँ सुरे स्वाहा ॥५॥ अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे । उद्धृतासि वराहेण कृष्णेन शतबाहुना ॥ मृत्तिके ब्रह्मपूतासि काश्यपेनाभिवन्दिता । त्वया हतेन पापेन गच्छामि परमां गतिम् ॥ मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम् । [९] इति संप्रार्थ्य तस्या भागद्वयं कृत्वा प्रथमभागं वामहस्तेन नाभेरधः कटिप्रदेशं

---

६. पूरा अँजुली पानी लिनू । ७. तीर्थको तटमा जल फ्याँकिदिनू । ८. माटो हातमा लिनू—

९–यसरी माटोको प्रार्थना गरेर पहिलो भागलाई बायाँ हातले नाइटोभन्दा तल कम्मरमा, पेटमा तिघ्रामा, जाँघमा, गोडामा, हातमा प्रत्येकमा चुप्पै तीन-तीनपल्ट दलेर हात पखालेर आचमन गरेर दोस्रो भागलाई निधारदेखि नाइटोसम्म लेपन गर्नु अनि नाइटोसम्म तीर्थजलमा पसेर सूर्यतिर फर्केर 'आपो अस्मान' भन्ने मन्त्र पढ्दै ...

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वस्ति ऊरू जङ्घे चरणौ करौ च प्रत्येकं तूष्णीं त्रिस्त्रिरनुलिप्य हस्तं प्रक्षाल्याचम्य द्वितीयभागं दक्षिणहस्तेन ललाटादिनाभिपर्यान्तानि गात्राण्युपलेपयेत् ॥ ततो नाभिमात्रं तीर्थजलं प्रविश्य सूर्याभिमुखः स्नायात्—ॐ आपोऽअस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु । विश्वᳬ हिरिप्रप्रवहन्ति देवीः ॥६॥ [10]इति मन्त्रेण निमज्य पुनः (फेरि) ॐ उदिदाब्भ्यः शुचिरापूत ऽ एमि ॥ ७ ॥ इति मन्त्रेण द्वितीयवारं निमज्य पुनस्तूष्णीं निमज्योन्मज्याचामेत् ॥ [11] गोमयलेपनम्—

१०–यो मन्त्रले दोस्रोपल्ट डुबेर फेरि बिना–मन्त्रै डुबेर उठेर आचमन गर्नू ।

११–गोबर हातमा लिएर मन्त्रनू—

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अग्रमग्रं चरन्तीनामोषधीनां वने वने। तासां वृषभपत्नीनां पवित्रं कायशोधनम् ॥ तन्मे रोगांश्च शोकांश्च पापं मे हर गोमय। इति मन्त्रेण गोमयमभिमन्त्र्य–ॐ मा नस्तोके तनये मा नऽआयुषि मा नो गोषु मा नोऽ अश्वेषु रीरिषः। मा नो व्विरान्न्रुद्र भामिनो व्वधीर्हविष्मन्तः सदामित्त्वा हवामहे ॥८॥ [12] इति मन्त्रेण सोदकं गोमयं सूर्याय दर्शयित्वा मृत्तिकालेपनवल्ललाटादिपादपर्यन्तानि अङ्गानि त्रिवारमनुलिप्य स्नायात् ॥ [13] भस्मलेपनम्–

ॐ जलमिति भस्म। स्थलमिति भस्म। व्योमेति भस्म। सर्वं ठं० हवा इदं भस्म। मन एतानि चक्षूंठं०षि भस्मानीति ॥ ॐ प्रसद्य भस्मना योनिमपश्च पृथिवी मग्ने। स ठं०सृज्य मातृभिष्ट्व-

१२–यस मन्त्रले जलसहित गोबर सूर्यलाई देखाएर माटो लेपन गरेजस्तै निधारदेखि गोडासम्मका अङ्गमा तीनपल्ट लेपन गरेर न्वाहुनू ॥

१३–भस्म हातमा लिएर मन्त्र पढ्नू।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ज्ज्योतिष्म्मान्न्पुनरा सदः ॥९॥ [१४]इति मन्त्रेण दक्षिणहस्तेन नाभित ऊर्ध्वं ललाटाद्यङ्गेषु भस्म लेपनं कृत्वा ॥ [१५]मार्जनम्—ॐ इमम्मे व्वरुण श्श्रुधी हवमद्या च मृडय । त्त्वामवस्युरा चके ॥१०॥ तत्त्वा यामि ब्ब्रह्मणा व्वन्दमानस्तदाशास्ते यजमानो हविर्ब्भिः ॥ अहेडमानो व्वरुणे हवोद्ध्युरुशꣳस मान ऽ आयुः प्प्रमोषीः ॥११॥ त्त्वन्नो ऽ अग्ने व्वरुणस्य विद्वान् देवस्य हेडो ऽ अवयासिसीष्ठ्ठाः । यजिष्ठो व्वह्नितमः शोशुचानो व्विश्श्वाद्वेषाꣳसि प्प्रमुमुग्ध्यस्म्मत ॥१२॥ ॐ सत्त्वन्नो ऽ अग्ने वमो भवोती नेदिष्ठ्ठो ऽ अस्या ऽ उषसो व्व्युष्टौ । अवयक्ष्व नो व्वरुणꣳ रराणो व्वीहि मृडीकꣳ सुहवो न ऽ एधि ॥१३॥ मापोमौषधीर्हिꣳसीर्द्धाम्म्नो धाम्नो राजँस्ततो व्वरुण

---

१४. यस मन्त्रले दक्षिण हातले नाइटोभन्दा माथितर निधार आदि अंगहरूमा भस्म लेपन गरेर ॥

१५. तलका मन्त्रले सबै शरीमा जल छर्किराख्नू—

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नो मुञ्च । यदाहुरघ्न्या ऽ इति व्वरुणेति शपामहे ततो व्वरुण नो मुञ्च ॥१४॥ उदुत्तमं व्वरुणपाशमस्मदवाधमं व्वि मध्यम ᳪ श्रथाय । अथा व्वयमादित्यव्रते तवानागसो ऽ अदितये स्याम ॥१५॥ मुञ्चन्तु मा शपथ्या-दथो वरुण्यादुत । अथो यमस्य पड्वीशात्सर्व्वस्माद्देव किल्बिषात् ॥१६॥ अवभृथनिचुम्पुण निचेरुरसि निचुम्पुणः । अवदेवै र्देवकृतमेनोयासिषमव मर्त्त्यै-र्मर्त्त्यकृतम्पुरुराव्णो देव रिषस्पाहि ॥१७। [१६]इति मन्त्रैः सर्वाङ्गानि मार्जयित्वा पश्चात्तूष्णीं स्नात्वाऽऽचम्य, पुनर्दर्भैर्मार्जनम् -ॐ आपो हि ष्ठा मयोभुवस्ता न ऽ ऊर्ज्जे दधातन । महे रणाय चक्षसे ॥१८॥ यो व शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥१९॥ तस्मा ऽ

१६. यी मन्त्रले सबै शरीरमा जल छर्केर चुपचाप न्वाहेर आचमन गरेर फेरि तीनोटा कुश र जलले नाभिको दक्षिण भागबाट थालेर शिरमा पुन्याएर नाभिको बायाँ भागपर्यन्त एक फन्को आफूलाई मार्जन गरेर अनि पानी छुनू—।अनि नाभिभन्दा माथि मार्जन गर्नू ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अरङ्गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः ॥२०॥
इदमापः प्रवहतावद्यञ्च मलञ्च यत्। यच्चाभिदुद्रोहानृतं यच्च शेपे ऽ
अभिरुणम्। आपो मा तस्मादेनसः पवमानश्च मुञ्चतु ॥२१॥ हविष्म-
तीरिमा ऽ आपो हविष्मॉं २॥ ऽ आविवासति। हविष्मान्देवो ऽ अद्ध्वरो
हविष्मॉं २॥ अस्तु सूर्य्यः ॥२२॥ देवीरापो ऽ अपान्नपाद्यो व ऽ ऊर्म्मिर्ह-
विष्य ऽ इन्द्रियावान्मदिन्तमः। तन्देवेभ्यो देवत्राऽदत्त शुक्रपेभ्यो
येषान्भागस्थ स्वाहा ॥२३॥ कार्षिरसि समुद्रस्यत्वाक्षित्या ऽ उन्नयामि।
समापो ऽ अद्भिरग्मत समोषधीभिरोषधीः ॥२४॥ आपो देवामधुमतीर-
गृभ्णन्नूर्जस्वती राजस्वश्चितानाः॥ याभिर्म्मित्रावरुणावभ्यषिञ्चन्याभि-
रिन्द्रमनयन्नत्यरातीः ॥२५॥ द्रुपदादिव मुमुचानः स्विन्नः स्नातो मला-
दिव। पूतम्पवित्रेणेवाज्ज्यमापः शुन्धन्तु मैनसः ॥२६॥ शन्नो देवीरभिष्टय ऽ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आपो भवन्तु पीतये । शं य्योरभिस्रवन्तु नः ॥२७॥ अपा ꣳ रसमुद्वय-
यस ꣳ सूर्य्ये सन्त ꣳ समाहितम् । अपा ꣳ रसस्य यो रसस्तं व्वो गृह्णाम्म्युत्त-
ममुपयामगृहीतासीन्द्रायत्त्वाजुष्टङ्गृह्णाम्म्येष ते योनिरिन्द्राय त्त्वा जुष्टतमम्
॥२८॥ अपो देवीरुपसृजमधुमतीरयक्ष्माय प्प्रजाब्भ्यः । तासामास्त्थानादुज्जि-
हतामोषधयः सुपिप्पलाः ॥२९॥ पुनन्तु मा पितरः सोम्म्यासः पुनन्तु मा
पितामहाः पुनन्तु प्प्रपितामहाः । पवित्त्रेण शतायुषा ॥३०॥ पुनन्तु मा
पितामहाः पुनन्तु प्प्रपितामहाः । पवित्त्रेण शतायुषा विश्वमायुर्व्व्यश्नवै
॥३१॥ अग्न ऽ आयू ꣳ षि पवस आसुवोर्ज्जमिषञ्चनः । आरे बाधस्व
दुच्छुनाम् ॥३२॥ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः । पुनन्तु वि-
श्वा भूतानि जातवेदः पुनीहि मा ॥३३॥ पवित्त्रेण पुनीहि मा शुक्क्रेण
देव दीद्यत् । अग्ने क्क्रत्वा क्क्रतूँ ऽ रनु ॥३४॥ यत्ते पवित्त्रमर्चिष्व्यग्ने

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्वितततमन्तरा । ब्ब्रह्म तेन पुनातु मा ॥३५॥ पवमानः सोऽअद्य नः पवित्त्रेण व्विचर्षणिः । यः पोता स पुनातु मा ॥३६॥ उभाब्भ्यान्देव-सवितः पव्वित्त्रेण सवेन च । माम्पुनीहि व्विश्श्वतः ॥३७॥ व्वैश्वदेवी पुनती देव्व्यागाद्यस्यामिमा बह्व्यस्तन्न्वो व्वीतपृष्ठाः । तया मदन्तः सधमादेषु व्वयँ स्याम पतयोरयीणाम् ॥३८॥ इति मन्त्रैः सजलेन कुशत्रयेण नाभिदक्षिणपार्श्वमारभ्य शिरो नीत्वा नाभिवामपार्श्वपर्यन्तं प्रदक्षिणमात्मानं मार्जयित्वा पश्चादुदकं स्पृशेत् ॥[१७]ततः-ॐचित्पतिर्म्मा पुनातु देवो मा सविता पुनात्वच्छिद्द्रेण पवित्त्रेण सूर्य्यस्य रश्मिभिः । तस्य ते पवित्रपते पवित्त्रपूतस्य यत्कामः पुनेतच्छकेयम् ॥३९॥ इति मन्त्रेण नाभेरूर्ध्वं मार्जयेत् ॥ [१८] ॐव्वाक्पतिर्म्मा पुनात्त्वच्छिद्द्रेण पवित्त्रेण सूर्य्य-

---

१७-अब नाभिभन्दा माथितर मार्जन गर्नू । १८-अब नाभिमन्दा तल न्वाहुनू ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्य रश्मिभिः। तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥४०॥ इति मन्त्रेण नाभेरधो मार्जयेत् ॥ [१९] ॐ देवोमा सविता पुनात्त्वच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः। तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुनेतच्छकेयम् ॥४१॥ इति मन्त्रेण सर्वाङ्गे मार्जयेत् ॥ [२०] ततः- ॐ भूः पुनातु। ॐ भुवः पुनातु। ॐ स्वः पुनातु। ॐ महः पुनातु। ॐ जनः पुनातु। ॐ। तपः पुनातु। ॐ सत्यं पुनातु। ॐ तत्सवितुर्व्वरेण्यं० सर्वं पुनातु ॥ इति कुशैर्मार्जयित्वा ॥ [२१] अपामार्गेण मार्जनम्-अपाघमपकिल्बिषमपकृत्यामपोरपः। अपामार्गत्वमस्मदपदुःष्वप्न्य

१९-अब सबै अङ्गमा मार्जन गर्नू। २०-फेरि कुशले मार्जन गरिरहनू।

२१-अपामार्गले शिरमा तीनपल्ट मार्जन गर्नू।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ठं०सुव ॥४२॥ इति मन्त्रेण अपामार्गैस्त्रिभिर्मार्जयेत् ॥ [२२] ततः दूर्वा-ङ्कुरेण मार्जनम्—ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि । एवा नो दूर्व्वे प्रतनु सहस्रेण शतेन च ॥५२॥ इति मन्त्रेण दूर्वाभिस्त्रि-भिर्मार्जयेत ॥ [२३] अघमर्षणम्—वक्ष्यमाणषट्पक्षाणामन्यतमेनान्तर्जले मग्नोऽनुच्छ्वसन्नघमर्षणं कुर्यात ॥ तद्यथा-ॐ द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव । पूतम्पवित्रेणेवाज्ज्यमापः शुन्धन्तु मैनसः॥५३॥ इति वा त्रिः पठेत्॥ ॐ आयंगौः पृश्निरक्रमीदन्नमातरम्पुरः ।पितरञ्च प्रयन्त्स्वः ॥५४॥ इति वा त्रिः पठेत् ॥ सशिरसं प्राणायामं वा त्रिः पठेत ॥ यथा--

---

२२-दूबोले तीनपल्ट मार्जन गर्नू ।

२३-अब अघमर्षण अर्थात् नाकको दाहिने प्वालबाट पानी तानेर बायाँ प्वालबाट फ्याँकिदिनू तलका मन्त्रले ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तमः ॐ सत्यम् ॐ तत्सवितु० स्वरोम्। ॐ इति वा त्रिः पठेत्॥ [२४] यद्वा परमात्मानं विष्णुं शेषशायिनं सायुधं सश्रीकमेकाग्रमनसा ध्यायेत्।

एवं स्नानं कृतं स्यात्॥

[२५] ततः स्नानाङ्गतर्पणम्-एतत् तर्पणं जीवत्पितृकेनापि-ब्रह्मादि चित्रगुप्तपर्यन्तं कृत्वा-स्वपित्रादितर्पणं वस्त्रनिष्पीडनं च वर्जयित्वा—ब्रह्मार्चनादि स्नानादिकर्माङ्ग भूतदेवताविसर्जनपर्यन्तं तर्पणविधिर्विधेयः।

---

२४. अथवा परमात्मा शेषशायी हतियार लिएका लक्ष्मीसहितका विष्णुलाई मनले ध्यान गर्नू (स्नान सकियो)

२५. अब स्नानाङ्ग तर्पण--पूर्व फर्केर तीन कुड्का कुश लिएर सव्यैले देवतीर्थले (अंगुल्यग्रले) देवताहरूलाई एक एक अञ्जलि दिनू—यो तर्पण बाबु हुनेले-ब्रह्मादेखि चित्रगुप्त सम्म गरेर पित्रादिको तर्पण र वस्त्रनिष्पीडन छाडेर ब्रह्मा आदिको पूजा देखिन विसर्जन पर्यन्तको तर्पण बिधि गर्नू॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न जीवत्पितृकः कुर्यात् वस्त्रनिष्पीडनं बुधः। न जीवत्पितृकः कुर्यात कृष्णैस्तिलैश्च तर्पणम् ॥ (लौगाक्षी)॥ अतः पूर्वाभिमुखः सन कुशत्रयं गृहीत्वा तदग्रैः सव्येन देवतीर्थेन देवेभ्य एकैकमञ्जलिं दद्यात् ॥ प्रत्येकमेकैकेन चुलकेन-ॐ ब्रह्मा तृप्यताम् । ॐ विष्णुस्तृप्यताम् । ॐ रुद्रस्तृप्यताम् । ॐ प्रजापतिस्तृप्यताम् । ॐ देवास्तृप्यन्ताम् । ॐछन्दांसि तृप्यन्ताम् । ॐ वेदास्तृप्यन्ताम् । ॐ ऋषयस्तृप्यन्ताम् । ॐ पुराणाचार्यास्तृप्यन्ताम् । ॐ गन्धर्वास्तृप्यन्ताम् । ॐ इतराचार्यास्तृप्यन्ताम् । ॐ संवत्सरः सावयवस्तृप्यताम् ॥ ॐ देव्यस्तृप्यन्ताम् । ॐअप्सरसस्तृप्यन्ताम् । ॐ देवानुगास्तृप्यन्ताम् । ॐ नागास्तृप्यन्ताम् । ॐ सागरास्तृप्यन्ताम् । ॐ पर्वतास्तृप्यन्ताम् । ॐ सरितस्तृप्यन्ताम् । ॐ मनुष्यास्तृप्यन्ताम् । ॐ यक्षास्तृप्यन्ताम् । ॐ रक्षांसि तृप्यन्ताम् । ॐ पिशाचास्तृप्यन्ताम् । ॐ सुपर्णास्तृप्यन्ताम् । ॐ भूतानि तृप्यन्ताम् । ॐ पशवस्तृप्यन्ताम् । ॐ वनस्पतय-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्तृप्यन्ताम्। ॐ ओषधयस्तृप्यन्ताम्। भूतग्रामचतुर्विधस्तृप्यताम्

[२५A]तत उदगग्रान् कुशान् धृत्वा तदग्रैर्निवीत्या प्रजापतितीर्थेन, ऋषिभ्यो द्वौ द्वावञ्जली देयौ ॥ ॐ सनकस्तृप्यताम्। ॐ सनन्दनस्तृप्यताम्। ॐ सनातनस्तृप्यताम्। ॐ कपिलस्तृप्यताम्। ॐ आसुरिस्तृप्यताम्। ॐ वोढुस्तृप्यताम्। ॐ पञ्चशिखस्तृप्यताम् ॥ ॐ भूऋषयः स्तृप्यन्ताम्। ॐ भुवऋषयस्तृप्यन्ताम्। ॐ स्वऋषयस्तृ०। ॐ भूर्भुवःस्वऋषयस्तृ०।

[२६]ततः पितृतर्पणे भुग्नान्दक्षिणाग्रमूलान् दर्भान् धृत्वाऽपसव्येन पितृतीर्थेनोङ्कारपूर्वकं पितृभ्यस्त्रीं स्त्रीन्नञ्जलीन् दद्यात् ॥ ॐ कव्यवाडनलस्तृप्यताम् ३। ॐ सोमस्तृप्यताम् ३। ॐ यमस्तृप्यताम् ३। ॐ अग्निष्वात्ताः पितर

२५A–तब उत्तर फर्केका कुश लिएर तिनको अग्रभागले निवीती भएर प्रजापति तीर्थले ऋषिहरूलाई दुइ दुइ अञ्जलि दिनू। (उपनीति —सव्य। प्राचीनावीति—अपसव्य। निवीति—कण्ठसूत्र,

२६– तब पितृतर्पणमा भाँचेका दक्षिणातिर फेद फर्केका कुश लिएर अपसव्यले पितृतीर्थले ओंकार पूर्वक पितृहरूलाई तीन तीन अंञ्जलि दिनू। औंलाका टुप्पो देव, कान्छी औंलाको फेद काय, चोर

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रावणी विधिः ३५

स्तृप्यन्ताम् ३ । ॐ सोमपाः पितरस्तृप्यन्ताम् ३ । ॐबर्हिषदः पितरस्तृप्यन्ताम् ३। ॐ यमाय नमः ३ । ॐधर्मराजाय नमः ३ । ॐमृत्यवे नमः ३ । ॐ अन्त-काय नमः ३ । ॐ वैवस्वताय नमः ३ । ॐकालाय नमः ३ । ॐ सर्वभूत क्षयाय नमः ३ । ॐ औदुम्बराय नमः ३ । ॐ दध्नाय नमः ३ । ॐ नीलाय नमः३ । ॐ परमेष्ठिने नमः ३। ॐवृकोदराय नमः ३। ॐ चित्राय नम, ३ । ॐचित्रगुप्ताय नमः ३ ॥

अब बाबु नहुनेलेमात्रै अपसव्य नै रहेकामरेका पितृहरूलाई दक्खिन फर्केर तिल कुश जलले तीन-तीन अञ्जलि तल बताएको क्रमले गोत्र सम्बन्ध नाम उच्चारण गरेर स्वरूप सम्झी 'तृप्यताम् इदं तिलोदकं तस्मै (तस्यै) स्वधा -भनेर तर्पण दिनू ।

क्रम-पितृभ्यः प्रथमं दद्यात् ततो मातृभ्य एव च । ततो मातामहानां च तत्पत्नीनां ततो जलम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ॐ उशन्तस्त्वा निधीमह्युशन्तः समिधीमहि। उशन्नु शतऽआहव पितॄन् हविषेऽअत्तवे ॥ ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः ॥ अक्षन्पितरोमी-मदन्त पितरो तीतृपन्त पितरः पितरः शुन्धद्ध्वम् इति पठन् पितृ-पितामह-प्रपितामहेभ्यः अमुकामुकामुकशर्मभ्यो वसु-रुद्राऽऽदित्यस्वरूपेभ्यः ॥ मातृ पितामही-प्रपितामहीभ्यः अमुकामुकामुकदेवीभ्यः वसुरुद्रादित्यस्वरूपाभ्यो दद्यात् ॥ ततः-नमो वः पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्तासतो वः पितरो देष्मैतद्वः पितरो वासऽ आधत्त ॥ इति मंत्रं पठन् मातामह - प्रमातामह-वृद्धप्रमाता-महेभ्यः तथा मातामही-प्रमातामही-वृद्धप्रमातामहीभ्यो दद्यात् ॥ अन्यांश्च

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(न्वाहेकै लुगाको छेउ अलिकति निचोरिदिनू)·

ॐ आब्रह्मस्तम्बपर्यन्तं देवर्षि-पितृ-मानवाः । तृप्यन्तु पितरः सर्वे मातृमातामहादयः ॥ अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम् । आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकम् ॥ येऽबान्धवा बान्धवा ये येऽन्यजन्मनि बान्धवाः ते सर्वे तृप्तिमायान्तु मया दत्तेन वारिणा ॥ ये के चाऽस्मत्कुले जाता अपुत्रा गोत्रिणो स्मृता॰ ते गृह्णन्तु मया दत्तं वस्त्रनिष्पीडनोदकम् ॥ ततः सव्येन शुद्धोदकेन आचम्य प्राणायामं कुर्यात्·(तब सबैलेसव्य भएर आचमन गरेर प्रणायाम गर्नू)

[२७]ततः आचम्य यद्मतर्पणम्— यन्मया दूषितं तोयं शारीरमलसम्भवात् । तस्य पापस्य शुद्ध्यर्थं यद्मै तत्ते तिलोदकम् ॥ इति मन्त्रेण

२७– तब सव्य भै बाबु आमा हुने नहुने सबैले आचमन गरेर यद्मतर्पण गर्नू-अर्थात् तिल मिसिएको जलको अञ्जलि तीर्थको तटमा फ्याँक्नू ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तीर्थतटे तिलमिश्रं जलाञ्जलिं निक्षिपेत् ॥
२८अथ लतादिकेषु शिखोदकत्यागः--लतागुल्मेषु वृक्षेषु पितरो ये व्यवस्थिताः । ते सर्वे तृप्तिमायान्तु मयोत्सृष्टैः शिखोदकैः ॥ इति मन्त्रेण स्वदक्षिणभागे शिखाग्रं निष्पीडयेत् ॥ अब बाबु हुने नहुने सबैले अक्षता-फूलले ब्रह्मादिको पूजा गर्नू-ॐ ब्रह्मयज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचोव्वेनऽआवः । सबुध्न्याऽ उपमाऽ अस्य व्विष्ठाः सतश्च योनिमसतश्च व्विवः॥ ॐ ब्रह्मणे नमः॥ ॐइदं विष्णुर्विचक्रमे त्रेधा निदधेपदम्। समूढमस्य पाᳫँ सुरे स्वाहा।ॐ विष्णवे नमः॥ॐ नमस्ते रुद्रमन्यवऽ उतोतऽ इषवे नमः। बाहुभ्यामुतते नमः॥ ॐ रुद्राय नमः॥ ॐ तत्सवितुर्०॥ ॐसवित्रे नमः॥ ॐ मित्रस्य चर्षणी धृतो वो देवस्य सानसि । द्युम्नञ्चित्रश्रवस्तमम् ॥ ॐ मित्राय नमः॥ ॐ

२८--अब आफ्नू दाहिनेतिर टुप्पी निचोरिदिनू

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इमम्मे ऽवरुण श्रुधी हवमद्या च मृडय । त्वामवस्युराचके ॥ ॐ वरुणाय नमः।

ततः सूर्यपूजनं सूर्योपस्थानं च कुर्यात् ॥ सूर्यपूजनम्---ॐ उदुत्यञ्जातवेदसन्देवं व्वहन्ति केतवः दृशे विश्वाय सूर्य्यम् ॥ इति मन्त्रेण सूर्यं गन्धाक्षतपुष्पैः संपूज्यार्घ्यं दत्वा सूर्यमुदीक्षन्--

सूर्योपस्थानम्--अदृश्रमस्य केतवो विरश्मयो जनाँ २ ॥ ऽअनु । भ्राजन्तो ऽअग्नयो यथा । उपयाम गृहीतोसि सूर्याय त्वा भ्राजायैषते योनिः सूर्याय त्वा भ्राजाय । सूर्य भ्राजिष्ठ भ्राजिष्ठस्त्वन्देवेष्वसि भ्राजिष्ठो हम्मनुष्येषु भूयासम् ॥ ॐ हꣳस: शुचिषद्वसुरन्तरिक्षसद्धोता ऽवेदिषद् तिथिर्दुरोणसत् । नृषद्वर सदृत सद्व्योम सदब्जा गोजाऽ ऋतजाऽ अद्रिजाऽ ऋतम्बृहत् ॥ॐ उद्वयन्तमसस्परि स्वः पश्यन्त ऽ उत्तरम् । देवन्दे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वत्रा सूर्य्यमगन्मज्ज्योतिरुत्तमम् ॥ १ ॥ उदुत्यञ्जातवेदसन्देवं वहन्ति केतवः । दृशे व्विश्वाय सूर्य्यम् ॥२॥ चित्रन्देवानामुदगादनीकञ्चक्षुर्म्मित्रस्य व्वरुणस्याग्ने । आप्राद्यावापृथिवी ऽ अन्तरिक्ष ꣳ सूर्य्य आत्त्मा जगतस्तस्त्थुषश्श्च ॥ ३ ॥ तच्चक्षुर्द्देवहितम्पुरस्ताच्छुक्रमुच्चरत । पश्येम शरदः शतञ्जीवेम शरदः शत ꣳ शृणुयाम शरदः शतम्प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतम्भूयश्च शरदः शतात् ॥ ४ ॥ नमः सवित्रे जगदेकचक्षुषे, जगत्प्रसूतिस्थितिनाशहेतवे ॥ त्रयीमयाय त्रिगुणात्मधारणे, विरञ्चिनारायणशङ्करात्मने ॥ १ ॥ इति सूर्यं मनसैव प्रदक्षिणीकृत्य नमस्कृत्य दिग्देवतानां नमस्कारः--

प्राच्यै- ॐ इन्द्राय नमः ॥ आग्नेय्यै-ॐ अग्नये नमः ॥ दक्षिणायै-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ॐ यमाय नमः ॥ नैर्ऋत्यै-ॐ निर्ऋतये नमः ॥ पश्चिमायै-ॐ वरुणाय नमः ॥ वायव्यै-ॐ वायवे नमः ॥ उदीच्यै-ॐ सोमाय नमः ॥ ईशान्यै-ॐ ईशानाय नमः ॥ जलमध्ये-ॐ अनन्ताय नमः ॥ सर्वदिक्षु-ॐ ब्रह्मणे नमः । ॐ अग्नये नमः । ॐ पृथिव्यै नमः । ॐ ओषधीभ्यो नमः । ॐ वाचे नमः । ॐ वाचस्पतये नमः । ॐ महद्भ्यो नमः । ॐ विष्णवे नमः । ॐ अद्भ्यो नमः । ॐ अपां पतये नमः । ॐ वरुणाय नमः ॥ अब बूढी र कान्छी औंलाले पानीमा घुमाइराख्नू-ॐ सं वर्चसा पयसा सन्तनूभिरगन्महि मनसा स ठं० शिवेन ॥ त्वष्टा सुदत्रो विदधातु रायो नुमष्टु तन्वो यद्विलिष्टम् ॥ र ती दुवै औंलाले दुवै ओठमा छुनू ॥ अब चन्दन अक्षता फूल चढाएर विसर्जन गर्नू-ॐ देवा गातु विदो गातुं वित्त्वा गातु मित । मनसस्पत इमन्देव यज्ञ ठं स्वाहा व्वातेधाः ॥ अब हात जोडेर

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अर्पण गर्नू -ॐ अनेन यथाशक्तिकृतेन एतावता कर्मणा भगवान् जनार्दनः वासुदेवः प्रीयतां न मम ॥ ॐ तत्सत् ब्रह्मार्पणमस्तु । ॐ विष्णवे नमः ।

३०अथ ब्रह्मयज्ञप्रयोगः--ततः धौतवाससी परिधाय दर्भासनादौ प्राङ्मुख उदङ्मुखो वा उपविश्य भस्मगोपीचन्दनादि धृत्वा पवित्रपाणिः आचम्य प्राणानायम्य मध्याह्न-सन्ध्यां कृत्वा सङ्कल्पः-ॐ अद्य पूर्वोच्चारित एवं गुणविशेषेणविशिष्टायां शुभपुण्यतिथौ ममाऽऽत्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं-ॐ तत्सत् श्रीपरमेश्वरप्रीत्यर्थं यथाशक्ति ब्रह्मयज्ञे नाऽहं यक्षे। अथातो ब्रह्मयज्ञं व्याख्यास्यामः-इषेत्वादिषु मन्त्रेषु स्वं

३०-तब धोएको लुगा लाएर कुशासनमा पूर्व वा उत्तर फर्की बसेर भस्म गोपीचन्दन लाएर पवित्र हातमा लिएर आचमन गरेर, मध्याह्नसन्ध्या गरेर तब संकल्प गरी ब्रह्म यज्ञ गर्नू —

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

… गरेर, मध्याह्नसन्ध्या गरेर तब संकल्प गरी ब्रह्म यज्ञ गर्नू —

ब्रह्मान्तेषु दशप्रणवसहितेषु याः क्रियास्तत्र विवस्वानृषिः प्रजापतिर्देवता सर्वाणि छन्दांसि सर्वाणि सामानि प्रतिलिङ्गोक्ता देवता ब्रह्मयज्ञे विनियोगः ॥ न्यासाः—ॐ गौतमभारद्वाजाभ्यां नमः नेत्रयोः । ॐ विश्वामित्रजमदग्निभ्यां नमः श्रोत्रयोः ॐ वसिष्ठकश्यपाभ्यां नमः नासिकयोः ॐ अत्रये नमः वाचि । ॐ गायत्र्यग्निभ्यां नमः शिरसि । ॐ उष्णिक्सवितृभ्यां नमः ग्रीवायाम् । ॐ बृहतीबृहस्पतिभ्यां नमः अनुके = हनौ । ॐ बृहद्रथन्तरद्यावापृथिवीभ्यां नमः बाह्वोः । ॐ त्रिष्टुबिन्द्राभ्यां नमः नाभौ । ॐ जगत्यादित्याभ्यां नमः श्रोण्योः । ॐ अतिच्छन्दाप्रजापतिभ्यां नमः लिङ्गे । ॐ यज्ञायज्ञियवैश्वानराभ्यां नमः गुदे । अनुष्टुब्विश्वेभ्यो देवेभ्यो नमः ऊर्वोः । ॐ पङ्क्तिमरुद्भ्यो नमः जान्वोः । ॐ द्विपदाविष्णुभ्यां नमः पादयो
विच्छन्दावायुभ्यां नमः नासापुटस्थप्राणेषु । ॐ न्यूनाक्षराच्छन्दोभ्यो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नमः सर्वाङ्गेषु। एवमेवाङ्गानि योजयित्वा वेदमयः सम्पद्यते। नकुतश्चिद्भयं विन्दते। शापानुग्रहसामर्थ्यं ब्राह्मं तेजश्च वर्धते। स्वर्गलोकं परं साधनम्। धर्मार्थकाममोक्षस्य च। तस्य दारिद्र्यदुःखशोकरोगभयं न भवति। ऋषिर्देवता छन्दांसि विदित्वा। ऋङ्मयो यजुर्मयः साममयोऽथर्वमयोऽमृतमयो विष्णुरिदं कात्यायनस्य च॥ वामहस्ततले कुशपवित्रे 'द्वौ दर्भौ' कृत्वा तदुपरि दक्षिणहस्तम् अधोमुखं कृत्वा। ॐ भूर्भुवः स्वः तत्सवितु०। ॐ इषेत्वोर्ज्जेत्वा वायवस्थदेवो वः सविता प्रार्प्पयतु श्रेष्ठतमाय कर्म्मणऽ आप्यायद्ध्वमघ्न्याऽ इन्द्राय भागम्प्रजावतीरनमीवाऽ अयक्ष्मा मा वस्तेनऽ ईशतमाघश ठं० सो ध्रुवाऽ अस्मिन्गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि। वसोः पवित्रम हिरण्मयेन पात्रेण सत्यस्या-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उमामस्य पशून्पाहि । ॐवसोः पवित्रम् हिरण्मयेन पात्रेण सत्यस्या-

पिहितम्मुखम् । यौसावादित्ये पुरुषः सोसावहम् । ॐखम्ब्रह्म । व्रतमुपैष्य-
न्नन्तरेणाहवनीयञ्च गार्हपत्यञ्च प्राङ्क्तिष्ठन्नप ऽ उपस्पृशति । तद्यदप ऽ
उपस्पृशत्यमध्यो वै पुरुषो यदनृतम्वदतितेन पूतिरन्तरतो मेध्या वा ऽ आपो
मेध्यो भूत्वा व्रतमुपायानीति पवित्रम् वा ऽ आपः पवित्रपूतो व्रतमुपाया-
नीति तस्माद्वा ऽ अप ऽ उपस्पृशति ॥ १ ॥ सोग्निमेवाभीक्षमाणो व्रत-
मुपैति ॥ ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय
पूर्णमेवावशिष्यते । ॐ खं ब्रह्म । ॐ खं पुराणम् । ओं वायुरेव खमिति
हस्माह कौरव्यायणीपुत्रो वेद यं ब्राह्मणा विदुर्वेदेन न यद्वेदितव्यम् ॥
ॐ प्राश्नीपुत्रादासुरिवासिनः प्राश्नीपुत्र ऽ आसुरायणादासुरायण ऽ आसुरेरासुरि
र्याज्ञवल्क्याद्याज्ञवल्क्य ऽ उद्दालकादुद्दालको ऽ रुणादरुण ऽ उपवेशेरुपवेशिः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कुश्रेः कुश्रीर्वाजश्रवसो वाजश्रवाजिह्वावतो वाध्योगाज्जिह्वावान् बाध्योगो ऽसिताद्वार्षगणादसितो वार्षगणो हरितात्कस्यपाद्धरितः कश्यपः शिल्पात्कश्यपाच्छिल्पः कश्यपः कश्यपान्नैध्रुवेः कश्यपो नैध्रुविर्व्वाचो वागम्भिणया ऽअम्भिणयादित्त्यादादित्त्यानीमानि शुक्लानि यजू ꣳ षि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते ॥ ॐ अग्निमीड़े पुरोहितं यज्ञस्य देवमृत्त्विजम्। होतारं रत्नधातमम् ॥ ॐ अग्नऽआयाहि वीतये गृणानो हव्यदातये। निहोता सत्सि बर्हिषि ॥ ॐ शन्नो देवीरभिष्टय ऽ आपो भवन्तु पीतये। शं य्योरभिस्रवन्तु नः ॥ अथानुवाकान् वक्ष्यामि। मण्डलं दक्षिणमन्त्रिहृदयम्। अथ शिक्षां प्रवक्ष्यामि। अथातोऽधिकारः फलयुक्तानि कर्मांणि। अथातो गृह्यस्थालीपाकानां कर्म। बद्धिरादैच। समाम्नायः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

समाम्नातः । मयरसतजभनलगसंमितम् । पञ्चसम्वत्सरमयं युगाध्यक्षम् ।
गोःग्मा । अथातो धर्मजिज्ञासा । अथातो ब्रह्मजिज्ञासा । योगीश्वरं याज्ञ-
वल्क्यम् । नारायणं नमस्कृत्य । इति विद्यातपोयोनिरयोनिर्विष्णुरीडितः ।
वाग्यज्ञेनार्चितो देवः प्रीयतां मे जनार्दनः ॥ एवं ब्रह्मयज्ञं विधाय पाणयो-
गृहीतकुशानां कुशपवित्रस्य च उत्तरस्यां त्यागं कुर्यात् ॥ अर्पणम्—
अनेन ब्रह्मयज्ञाख्येन कर्मणा श्रीभगवान् परमेश्वरः प्रीयतां न मम ॥
ॐ तत्सद्ब्रह्मार्पणमस्तु ॥यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं
सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥ ॐ अच्युताय नमः ॐ अच्युताय
नमः ॐ अच्युताय नमः । चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च । हूयते
च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ॥ ॐ विष्णवे नमः ॥ इति ब्रह्मयज्ञः ॥

॥ इति श्रावणी स्नान विधिः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ यज्ञोपवीतमन्त्रणविधिः

प्रतिष्ठावाहनं चैव कालज्ञानं तथैव च ।
पूजोपवीतिदानं स्यात् प्राचीनावीतिपूर्वकम् ॥
उत्सर्गः पितरश्चैव, आचान्तो वंश एव च ।
तत्सवितुरित्यारभ्य सावित्र्या ब्रुवणं चतुः ॥
वीरतास्म इति सकृत् अध्यायादीन् पठेत्तदा ।
तदेतदृचाभ्युक्तं नमस्कारो विसर्जनम् ॥
समुद्रेति जले प्राश्य द्विराचान्तो गृहं व्रजेत् ॥

तत्र प्रथमम् ऋषि पूजनम् । अपामार्गमिश्रितैस्त्रिभिस्त्रिभिः कुशैः पृथक्-पृथक् गायत्रीं पठित्वा ब्रह्मग्रन्थियुक्ताः सप्तर्षयः कार्याः । एका अरुन्धती च ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ते च पीठे नवं सदशं (किनारीवाल) धौतं वस्त्रं रम्भापत्रं वा प्रसार्य तदुपरि तण्डुलपुञ्जं संस्थाप्य तस्मिन् प्रागग्रा उदगग्रा वा दक्षिणतः स्थापनीयाः ॥ नवीनयज्ञोपवीतानि एकस्मिन् बृहति पात्रे, रुद्राभिषेके सति अभिषेकपात्रे स्थापनीयानि, तत्रैव पूजनीयानि च ॥

ततः कर्ता आचम्य प्राणानायम्य कुश-कुसुम-यव-जलपाणिर्देशकालौ संकीर्त्य "अध्यायोत्सर्गकर्माङ्गत्वेन दीपकलशगणेशपूजनपूर्वकं (यज्ञोपवीत-मन्त्रणकर्मणि सपूजं रुद्राभिषेकं केचित् कुर्वन्ति केचिन्न, कृते सति) रुद्रमन्त्रैर्जलधारया रुद्रं सपूर्वपूजनम् अभिषेकं कारयन् ऋषिस्थापनपूजनं, रक्षाबन्धनपूजनं, यज्ञोपवीततन्तुदेवतापूजनम्, ऋषितर्पणं, वंशानां श्रवणं, कृताकृतम् ऋषिश्राद्धं, स्वपितृभ्यो यज्ञोपवीतदानं, ब्राह्मणेभ्यो यज्ञोपवीतदानं, नवीनयज्ञोपवीतधारणं, जीर्णयज्ञोपवीतोत्सर्गं, रक्षासूत्रबन्धनं चाऽहं करिष्ये" इति संकल्पं कुर्यात् ॥ ततो दीपं प्रज्वाल्य 'ॐनमोऽस्त्वनन्ताय०' इति संपूज्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ऋषिप्रतिष्ठा कार्या—यथा, पुष्पाक्षतान् गृहीत्वा–ॐ मनोजूतिर्ज्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टं यज्ञ ६ᐧ समिमन्दधातु । विश्वेदेवास ऽ इह मादयन्तामोम्२॥प्रतिष्ठ॥ एष वै प्रतिष्ठा नाम यज्ञो यत्रैतेन यज्ञेन यजन्ते सर्वमेव प्रतिष्ठितम्भवति ॥ ॐ प्रतिष्ठा सुप्रतिष्ठितमस्तु ॥ इति मन्त्रेण ऋष्युपरि अक्षतान् निक्षिपेत् ॥ अथ ऋष्यावाहनम्—पुष्पाक्षतान् गृहीत्वा दक्षिणस्थं प्रथमम्ऋषिं स्पृशन्–ॐ भूर्भुवः स्वः कश्यपाय नमः, कश्यपम् आवाहयामि । भो कश्यप ! इहागच्छ इह तिष्ठ मम पूजां गृहाण, यावत् पूजां करोमि तावत् त्वं सुस्थिरः सुप्रसन्नो वरदो भव ॥ १ ॥ पुनः पुष्पाक्षतान् गृहीत्वा द्वितीयम् ऋषिं स्पृशन्—ॐ भूर्भुवः स्वः भरद्वाजाय नमः, भरद्वाजम् आवाहयामि । भो भरद्वाज ! इहागच्छ, इह तिष्ठ मम पूजां गृहाण, यावत् पूजां करोमि तावत् त्वं सुस्थिरः सुप्रसन्नो वरदो भव ॥ २ ॥ पुनः पुष्पाक्षतान् गृहीत्वा तृतीयम् ऋषिं स्पृशन्–ॐ भूर्भुवः स्वः गौतमाय

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गृहीत्वा तृतीयम् ऋषिं स्पृशन्—ॐ भूर्भुवः स्वः गौतमाय

नमः, गौतमम् आवाहयामि । भो गौतम ! इहागच्छ, इह तिष्ठ मम पूजां गृहाण, यावत् पूजां करोमि तावत् त्वं सुस्थिरः सुप्रसन्नो वरदो भव ॥ ३ ॥ पुनः पुष्पाक्षतान् गृहीत्वा चतुर्थम् ऋषिं स्पृशन्—ॐ भूर्भुवः स्वः अत्रये नमः, अत्रिम् आवाहयामि, भो अत्रे ! इहागच्छ, इह तिष्ठ मम पूजां गृहाण यावत् पूजां करोमि तावत् त्वं सुस्थिरः सुप्रसन्नो वरदो भव ॥ ४ ॥ पुनः पुष्पाक्षतात् गृहीत्वा पञ्चमम् ऋषिं स्पृशन्—ॐ भूर्भुवः स्वः जमदग्नये नमः, जमदग्निम् आवाहयामि । भो जमदग्ने इहागच्छ इह तिष्ठ, मम पूजां गृहाण, यावत् पूजां करोमि तावत् त्वं सुस्थिरः सुप्रसन्नो वरदो भव ॥ ५ ॥ पुनः पुष्पाक्षतान् गृहीत्वा षष्ठम् ऋषिं स्पृशन्—ॐ भूर्भुवः स्वः वसिष्ठाय नमः, वसिष्ठम् आवाहयामि । भो वसिष्ठ ! इहागच्छ, इह तिष्ठ मम पूजां गृहाण, यावत् पूजां करोमि तावत् त्वं सुस्थिरः सुप्रसन्नो वरदो भव ॥ ६ ॥ पुनः पुष्पाक्षतान् गृहीत्वा सप्तमम् ऋषिं स्पृशन्—ॐ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भूर्भुवः स्वः विश्वामित्राय नमः, विश्वामित्रम् आवाहयामि । भो विश्वामित्र ! इहागच्छ, इह तिष्ठ मम पूजां गृहाण, यावत् पूजां करोमि तावत् त्वं सुस्थिरः सुप्रसन्नो वरदो भव ॥ ७ ॥ पुनः पुष्पाक्षतान् गृहीत्वा अष्टमीम् ऋषिपत्नीं स्पृशन्--ॐ भूर्भुवः स्वः अरुन्धत्यै नमः, अरुन्धतीमावाहयामि । भो अरुन्धति इहागच्छ, इह तिष्ठ मम पूजां गृहाण, यावत् पूजां करोमि तावत् त्वं सुस्थिरा सुप्रसन्ना वरदा भव ॥ ८ ॥ ततः पठेत्–

ॐ इमामेव गौतम–भरद्वाजावयमेव गौतमो ऽ यं भारद्वाजऽइमावेव विश्वामित्रजमदग्नी ऽ अयमेव विश्वामित्रो ऽ यं जमदग्निरिमावेव वसिष्ठकश्यपावयमेव वसिष्ठो ऽ यं कश्यपो वागेवात्रिर्वाचा ह्यन्नमद्यतेतिर्हवैनामैतद्यदत्रिरिति सर्वस्यात्ता भवति सर्वस्यान्नम्भवति य ऽ एवं वेद ॥

अथ संकल्पः–अद्येत्यादि शुभपुण्यतिथौ ममात्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

सप्तर्षिस्वऋषिपूजनमहं करिष्ये ।। तत्रादौ निर्विघ्नतासिद्ध्यर्थम् महागणपति-पूजनं कलशपूजनं च कृत्वा रुद्राभिषेकं कारयन् ऋषीन् ध्यायेत् । ध्यानम्–ॐ सप्त ऽ ऋषयः प्रतिहताः शरीरे सप्त रक्षन्ति सदमप्रमादम् । सप्तापः स्वपतो लोकमीयुस्तत्र जागृतो ऽ अस्वप्नजौ सत्रसदौ च देवौ ।। इदं विष्णुर्वि-चक्रमे त्रेधा निधदे पदम् । समूढमस्य पांसुरे स्वाहा ।। ॐ सहस्रशो० ।। ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिस्वऋषिभ्यो नमः, ध्यानपूर्वकमा-वाहनं समर्पयामि ।। आसनम्––सुवर्णघटितं दिव्यं नानारत्नसमन्वितम् । आसनं रुचिरं यच्च गृह्यन्तां भो मुनीश्वराः ।। ॐ पुरुष ऽ ए० ।। ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिस्वऋषिभ्यो नमः, आसनं समर्पयामि ।। पाद्यम्–गंगाजलं समानीतं गन्धद्रव्येण संयुतम् । पाद्यार्थं प्रतिगृह्णन्तु कश्यपाद्या महर्षयः ।। ॐ एतावानस्य० ।। ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्य-पादिस्वऋषिभ्यो नमः, पाद्यं समर्पयामि ।। अर्घ्यम्–सुवर्णपात्रसंयुक्तं गन्ध-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुष्पाक्षतैर्युतम् । सप्तर्षयः प्रगृह्णन्तु इदमर्घ्यं मयाऽर्पितम् ॥ ॐ त्रिपादूर्ध्व० ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः, अर्घ्यम् समर्पयामि ॥ आचमनम्–कर्पूरवासितं तोयं सुवर्णकलशे स्थितम् । दत्तमाचमनीयं च ऋषीणां प्रीतये सदा ॥ ॐ ततो व्वि० ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः, आचमनीयं समर्पयामि ॥ स्नानम्–सुगन्धिद्रव्यसंयुक्तं पवित्रं मङ्गलं जलम् । स्नानार्थं वः समानीतं गृह्यन्ताम् मुनयो मुदा ॥ ॐ तस्माद्यज्ञात्सर्व्व० ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः, स्नानं समर्पयामि ॥ पञ्चामृतस्नानम्–पयो दधि घृतं चैव मधुशर्करयाऽन्वितम् ॥ पञ्चामृतं मयानीतं स्नानार्थं प्रतिगृह्यताम् ॥ ॐ पञ्चनद्यः० ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः, पञ्चामृतस्नानं समर्पयामि ॥ गन्धोदकस्नानम्—ॐ गन्धद्वारां दु० ॥ ॐ भूर्भुवः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गन्धोदकस्नानं समर्पयामि ॥ पुनः पूजा ॥ महाभिषेकस्नानम्–ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिस्वऋषिभ्यो नमः, महाभिषेकस्नानं समर्पयामि ॥ वस्त्रम्–सूक्ष्माण्यतीव शुभ्राणि वस्त्राणि विविधानि च । ऋषयः प्रतिगृह्णन्तु उष्णशीतनिवारणे ॥ ॐ तस्माद्यज्ञा० ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादि---स्वऋषिभ्यो नमः, वस्त्रम् समर्पयामि ॥ यज्ञोपवीतम्—नानामन्त्रैः समुद्भूतं त्रिवृतं ब्रह्मसूत्रकम् । प्रत्येकं दीयते स्वच्छम् गृह्णन्तु ऋषयोमुदा ॥ ॐ तस्मादश्वा० ॥ ॐ भूर्भुवः स्वः अरुन्धतीरहितकश्यपादिस्वऋषिभ्यो नमः, यज्ञोपवीतानि समर्पयामि ॥ गन्धम् (चन्दनम्)—आत्मसन्तापहारं च सुगन्धद्रव्यसंयुतम् । चन्दनं तत्प्रयच्छामि ऋषीणां प्रीतिहेतवे ॥ ॐ तं यज्ञं० ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिस्वऋषिभ्यो नमः, गन्धम् समर्पयामि ॥ अक्षताः—शुभ्रतण्डुलजाः शुक्लाः शंखशुभ्रा मनोरमाः । अक्षतान् संप्रयच्छामि गृह्णन्तु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मुनिपुंगवाः ॥ ॐ अक्षन्नमी० ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिस्वऋषिभ्यो नमः अक्षतान् समर्पयामि ॥ हरिद्रा–कुंकुमद्रव्याणि–हरिद्रां कुंकुमं चैव कज्जलं भूषणानि च । कङ्कणं कण्ठसूत्रं च गृहाण परमेश्वराः ॥ ॐ अहिरिव० ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिस्वऋषिभ्यो नमः, हरिद्रा–कुंकुमद्रव्याणि समर्पयामि ॥ पुष्पाणि–माल्यादीनि सुगन्धीनि मालत्यादीनि सत्तमाः । मयार्पितानि पुष्पाणि गृह्णन्तु मुनिपुंगवाः ॥ ॐ यत्पुरुषम्० ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्पादिस्वऋषिभ्यो नमः, ऋतुकालोद्भवपुष्पाणि समर्पयामि ॥ धूपम्–कृष्णागुरुसमुद्भूतो धूपोऽयं च दशांगकः । सुगन्धः कश्यपादिभ्य ऋषिभ्यो दीयतेऽधुना ॥ ॐ ब्राह्मणो० ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिस्वऋषिभ्यो नमः, धूपं दर्शयामि ॥ दीपम्–पञ्चवर्तिसमायुक्तः सर्वमङ्गलशोभनः । मया निवेदितो भक्त्या दिपोऽयं प्रतिगृह्यताम् ॥ ॐ चन्द्रमा० ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्य-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रतिगृह्यताम् ॥ ॐ चन्द्रमामः ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यप-

पादिस्वऋषिभ्यो नमः, दीपं दर्शयामि ॥ नैवेद्यम्—फलमूलसमायुक्तं नाना-
शाकसमन्वितम् । शर्करा-घृतसंयुक्तं नैवेद्यं प्रतिगृह्यताम् ॥ ॐ नाभ्या ऽ
आ० ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिस्वऋषिभ्यो नमः, नैवेद्यं
समर्पयामि ॥ नैवेद्यमध्ये पानीयं समर्पयामि ॥ उत्तरापोशानं, हस्तप्रक्षालनं,
मुखप्रक्षालनं, करोद्वर्तनार्थे चन्दनं च समर्पयामि ॥ फलम्—नारिकेलं च
कूष्माण्डं कदली-कर्कटीफलम् । ऋतुकालोद्भवं चान्यद् दीयते ऽद्य मुनी-
श्वराः ॥ ॐ याः फलिनी० ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यप-
पादिस्वऋषिभ्यो नमः, फलानि समर्पयामि ॥ ताम्बूलम्—पूगीफलं सकर्पूरं
नागवल्लीदलैर्युतम् ॥ एलालवङ्गसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥ ॐ यत्पुरु-
षेण० ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिस्वऋषिभ्यो नमः, ताम्बूलं
समर्पयामि ॥ दक्षिणा—हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्त-
पुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ ॐ हिरण्यगर्भः० ॥ ॐ भूर्भुवः स्वः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अरुन्धतीसहितकश्यपादिस्वऋषिभ्यो नमः, दक्षिणां समर्पयामि ॥ कर्पूरार्तिक्यम्-ब्रह्मिष्ठा ब्रह्मरूपाश्च कश्यपाद्या महर्षयः। ब्रह्मप्रज्ञादिदातारः सन्तु मे कीर्तिकर्मणि ॥ ॐ इद ꣳ हवि० ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिस्वऋषिभ्यो नमः, कर्पूरार्तिक्यं दर्शयामि ॥ प्रदक्षिणा-यानि कानि च पापानि जन्मान्तरकृतानि च। तानि तानि विनश्यन्तु प्रदक्षिणपदे पदे ॥ ॐ सप्तास्या० ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिस्वऋषिभ्यो नमः प्रदक्षिणां समर्पयामि ॥ मन्त्रपुष्पयुक्तो नमस्कारः-शरणागत-दीनार्तपरित्राणपरायणाः। रक्षन्तु मुनयः सर्वे मामद्य शरणागतम् ॥ सप्तर्षयः शुभाः श्रेष्ठाः सर्वेषां च शुभप्रदाः। पुष्पाञ्जलिं मया दत्तं गृह्णन्तु मुनिसत्तमाः ॥ ॐ यज्ञेन यज्ञ० ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिस्वऋषिभ्यो नमः, मन्त्रपुष्पयुक्तं नमस्कारं समर्पयामि ॥ प्रार्थना-मन्त्रहीनं क्रियाहीनं भक्तिहीनं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रार्थना–मन्त्रहीनं क्रियाहीनं भक्तिहीनं ...

परिपूर्णं तदस्तु मे ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिस्वऋषिभ्यो नमः प्रार्थनां समर्पयामि ॥ अर्पणम्–अनेन मया वेदोत्सर्जनाङ्गत्वेन कृतेन ध्यानावाहनादि–षोडशोपचारादिपूजनेन अरुन्धतीसहितकश्यपादिसप्तर्षिस्व ऋषयः प्रीयन्ताम् न मम ॥ ॐ तत्सत् ब्रह्मार्पणमस्तु ॥ इति ऋषिपूजनम् ॥

अथ रक्षाबन्धनपूजा——यव–दूर्वा–सर्षप–चन्दन–गोमय–दधिसहितां रक्षां (संगिलएको बेमारले रँगाइको धागो) ताम्रपात्रे पुटे वा निधाय पात्रं स्पृशन् नारायणकवचं पठेत्–ॐ पूर्वे रक्षतु गोविन्द आग्नेयां धरणीधरः ॥ याम्यां रक्षतु वाराहो नारसिंहस्तु नैरृते ॥१॥ वारुण्यां केशवो रक्षेत् व्यायव्यां मधुसूदनः । उत्तरे श्रीधरो रक्षेत् ऐशान्यां तु गदाधरः ॥ २ ॥ ऊर्ध्वं गोवर्धनो रक्षेत् अधस्तात् तु महेश्वरः । एवं दश दिशो रक्षेत् वासुदेवो जनार्दनः ॥ ३ ॥ यज्ञाग्रे रक्षतात् शंखः पृष्ठे वै पद्ममुत्तमम् । वामपार्श्वे गदा रक्षेत् दक्षिणे तु सुदर्शनः ॥४॥ उपेन्द्रः पातु ब्रह्माणमाचार्यम् पातु वामनः । ऋग्वेदमच्युतो रक्षेत्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यजुर्वेदमधोक्षजः ॥ ५ ॥ कृष्णो रक्षतु सामानमथर्वाणञ्च माधवः । उपविष्टाँश्च विप्राँस्तान् अनिरुद्धोऽभिरक्षतु ॥ ६ ॥ अथ वक्ष्यमाणमन्त्रैः रक्षां पूजयेत्-ॐ रक्षोहणं व्वलगहनं व्वैष्णवीमिदमहन्तं व्वलगमुत्किरामि यम्मे निष्ट्यो यममात्यो निचखानेदमहन्तं व्वलगमुत्किरामि यम्मे समानो यमसमानो निचखानेदमहन्तं व्वलगमुत्किरामि यम्मे सबन्धुर्य्यमसबन्धुर्निचखानेदमहन्तं व्वलगमुत्किरामि यम्मे सजातो यमसजातो निचखानोत्कृत्याङ्किरामि ॥ १ ॥ ॐ स्वराडसि सपत्नहा सत्रराडस्यभिमातिहाजनराडसिरक्षोहा सर्व्वराडस्यमित्रहा ॥ २ ॥ ॐ रक्षहणो व्वो व्वलगहनः प्रोक्षामि व्वैष्णवान्रक्षोहणो वो व्वलगहनो वनयामि व्वैष्णवान्रक्षोहणो वो व्वलगहनो वस्तृणामि वैष्णवान्रक्षोहणो वां व्वलगहना ऽउपदधामि व्वैष्णवी रक्षोहणौ वां व्वलगहनौ पर्य्यूहामि वैष्णवी वैष्णवमसि वैष्णवास्त्थ ॥ ३ ॥
ॐ सप्त ऽ ऋषयः प्रतिहिताः ... ॥ सप्ताद्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

स्वपतो लोकमीयुस्तत्र जागृतो ऽ अस्वप्नजौ सत्रसदौ च देवौ
॥ इति रक्षाबन्धनपूजा ॥

अथ यज्ञोपवीततन्तुदेवता-पूजनम्—

तत्र प्रथमं यज्ञोपवीतप्रक्षालनम्-आपोहिष्ठेति तिसृणां सिन्धुद्वीप ऋषिः, आपो देवता, गायत्री छन्दः यज्ञोपवीतप्रक्षालने विनियोगः—ॐ आपो हि ष्ठा मयोभुवस्तान ऽ ऊर्ज्जे दधातन । महेरणाय चक्षसे । यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥ तस्मा ऽ अरङ्गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥ ततो यज्ञोपवीतानि प्रक्षाल्यानन्तरं दशगायत्रीमन्त्रैरभिमन्त्र्य-तन्तुदेवतानामावाहनम्—प्रणवस्य ब्रह्मा ऋषिः, परमात्मा देवता, गायत्री छन्दः, प्रथमतन्तौ ॐकारावाहने विनियोगः । ॐ प्रथमतन्तौ ॐकारमावाहयामि ॥

अग्निन्दूतमिति मेधातिथिर्ऋषिः, अग्निर्देवता, गायत्री छन्दः द्वितीय-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तन्तौ अग्न्यावाहने विनियोगः—ॐ अग्निन्दूतम्पुरो दधे हव्यवाह मुपब्रुवे । देवाँ २॥ ऽ आसादयादिह ॥ द्वितीयतन्तौ अग्निमावाहयामि ॥

नमोस्तु सर्पेभ्य ऽ इत्यस्य प्रजापतिर्ऋषिः, सर्पा देवताः, अनुष्टुप् छन्दः, तृतीयतन्तौ सर्पावाहने विनियोगः—नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु । ये ऽ अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ॥ तृतीयतन्तौ सर्पानावाहयामि ॥

वय ६ॅ सोमेत्यस्य बन्धुर्ऋषिः, सोमो देवता, गायत्री छन्दः, चतुर्थतन्तौ सोमावाहने विनियोगः—ॐ व्वय६ॅ सोम व्रते तव मनस्तनूषु बिभ्रतः । प्रजावन्तः सचेमहि ॥ चतुर्थतन्तौ सोममावाहयामि ॥

उदीरतामित्यस्य शंख ऋषिः, पितरो देवताः, त्रिष्टुप् छन्दः, पञ्चमतन्तौ पित्रावाहने विनियोगः—ॐ उदीरतामवर ऽ उत्परास ऽ उन्मध्यमाः पितरः सोम्यासः । असुँय्य ऽ ईयुरवृका ऋतज्ञास्ते नो वन्तु पितरो हवेषु ॥ पञ्चमतन्तौ पितॄनावाहयामि ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रजापतेरित्यस्य हिरण्यगर्भ ऋषिः, प्रजापतिर्देवता, त्रिष्टुप् छन्दः, षष्ठतन्तौ प्रजापत्यावाहने विनियोगः—ॐ प्रजापते ! न त्वदेतान्न्यन्यो विश्वा रूपाणि परिता बभूव । यत्कामास्ते जुहुमस्तन्नो ऽ अस्तु व्वय ६ स्याम पतयो रयीणाम् ॥ षष्ठतन्तौ प्रजापतये नमः प्रजापतिमावाहयामि ॥

आनोनियुद्भिरित्यस्य वसिष्ठ ऋषिः, अनिलो देवता, त्रिष्टुप् छन्दः, सप्तमतन्तौ अनिलावाहने विनियोगः-आ नो नियुद्भिः शतिनोभिरद्ध्वर ६ सहस्रिणीभिरुपयाहि यज्ञम् । व्वायो ऽ अस्मिन्त्सवने मादयस्व यूयम्पात स्वस्तिभिः सदा नः ॥ सप्तमतन्तौ अनिलाय नमः अनिलमावहयामि ॥

सुगाव इत्यस्यात्रिर्ऋषिः, गृहपतयो देवता, आर्षी त्रिष्टुप् छन्दः, अष्टमतन्तौ यमावाहने विनियोगः—ॐ सुगावो देवाः, सदना ऽ अकर्म्म ऽ आजग्मेद ६ सवनञ्जुषाणाः । भरमाणा व्वहमाना हवीᳬंष्यस्मे धत्त व्वसवो व्वसूनि स्वाहा ॥ अष्टम तन्तौ यमाय नमः, यममावाहयामि ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विश्वेदेवास ऽ आगत० इत्यस्य मधुच्छन्दा ऋषिः, विश्वेदेवा देवताः, त्रिष्टुप् छन्दः, नवमतन्तौ विश्वेषां देवानामावाहने विनियोगः--ॐ विश्वेदेवास ऽ आगत शृणुता म ऽ इम ६० हवम्। एदम्बर्हिर्न्निषीदत॥ नवमतन्तौ विश्वेभ्यो देवेभ्यो नमः, विश्वान् देवान् आवाहयामि ॥

अथ यज्ञोपवीतग्रन्थिदेवता ऽऽवाहनम्--

ब्रह्मयज्ञानमित्यस्य प्रजापतिर्ऋषिः, ब्रह्मा देवता, गायत्री छन्दः, ग्रन्थिमध्ये ब्रह्मावाहने विनियोगः--ॐब्रह्मयज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचो व्वेन आवः। सुबुध्न्या ऽ उपमा ऽ अस्य व्विष्ठाः सतश्च योनिमसतश्च व्विवः॥ इदं विष्णुरित्यस्य मेधातिथिर्ऋषिः, विष्णुर्देवता, गायत्री छन्दः, ग्रन्थिमध्ये विष्ण्वावाहने विनियोगः-ॐ इदं विष्णु० ॥ त्र्यम्बकमित्यस्य वसिष्ठ ऋषिः, रुद्रो देवता, विराट् ब्राह्मी त्रिष्टुप् छन्दः, ग्रन्थिमध्ये रुद्रावाहने विनियोगः-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न्तीय मामृतात् ॥ यज्ञोपवीतग्रन्थिदेवताभ्यो नमः, ग्रन्थिदेवताः आवाहयामि ॥ प्रणवाद्यावाहितदेवताभ्यो नमः, यथास्थानमहं न्यसामि ॥ मानसोपचारैः सम्पूज्य ॥ अथ ध्यानम्—प्रजापतेर्यत्सहजं पवित्रं, कार्पाससूत्रोद्भवब्रह्मसूत्रम् । ब्रह्मत्वसिद्ध्यै च यशः प्रकाशं जपस्य सिद्धिं कुरु ब्रह्मसूत्रम् ॥

अथ उत्सर्गाख्यम् ऋषितर्पणम्—

आचम्य प्राणानायम्य देशकालौ संकीर्त्य 'छन्दसां क्वचिदनध्यायादिकाले पठनादनधिकारिभिः श्रावणाच्च प्राप्तमालिन्यस्य निरासार्थमुत्सर्गाख्य-तर्पणमहं करिष्ये' इति संकल्प्य--सव्येन प्रागग्रैर्दर्भैर्देवतीर्थेन 'देवतर्पणम्' देवानामञ्जलित्रयं दद्युः—ॐ विश्वेदेवास ऽ आगत शृणुता म इम ६ हवम् । एदम्बर्हिर्निषीदत ॥ विश्वेदेवाः शृणुतेम ६ हवम्मे ये ऽ अन्तरिक्षे य ऽ उपद्यविष्ठ । ये अग्निजिह्वा ऽ उत वा यजत्रा ऽ आसद्यास्मिन् बर्हिषि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मादयध्वम् ॥ इति मन्त्राभ्यां देवानावाह्य––ॐ देवास्तृप्यन्तु, ॐ छन्दांसि तृप्यन्तु, ॐ वेदास्तृप्यन्तु, ॐ ऋषयस्तृप्यन्तु, ॐ पुराणाचार्यास्तृप्यन्ताम् । ॐ गन्धर्वास्तृप्यन्ताम्, ॐ इतराचार्यास्तृप्यन्ताम्, ॐ संवत्सरः सावयवस्तृप्यताम् ॥

ततः तूष्णिम् आचमनम् ॥ पश्चात् वंशानां ब्रुवणम्––

अथ वꣳशः समानमा साञ्जीवीपुत्रात्साञ्जीवीपुत्रो माण्डूकायनेर्माण्डूकायनिर्माण्डव्यान्माण्डव्यः कौत्सात्कौत्सो माहित्थेर्माहित्थिर्वामकक्षायणाद्वामकक्षायणो वात्स्याद्वात्स्यः शाण्डिल्याच्छाण्डिल्यः कुश्रेः कुश्रिर्यज्ञवचसो राजस्तम्बायनाद्यज्ञवचा राजस्तम्बायनस्तुरात्कावषेयात्तुरः कावषेयः प्रजापतेः प्रजापतिर्ब्रह्मणो ब्रह्म स्वयंभु ब्रह्मणे नमः ॥ वंशोक्ता ऋषयस्तृप्यन्ताम्[1] ॥ १ ॥ अथ वꣳशस्तदिदं वयꣳ शौर्पणाय्या-

१. समक्रपीणाम[illegible]

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

च्छौर्पणाय्यो गौतमाद्गौतमो वात्स्याद्वात्स्यो वात्स्याच्च पाराशर्याच्च पाराशर्यःसांकृत्याच्च भारद्वाजाच्च भारद्वाजऽऔदवाहेश्च शाण्डिल्याच्च शाण्डिल्यो वैजवापाच्च गौतमाच्च गौतमो वैजपायनाच्च व्वैष्ठपुरेयाच्च वैष्ठपुरेयः शाण्डिल्याच्च रौहिणायनाच्च रौहिणायनः शौनकाच्चात्रेयाच्च रैभ्याच्च रैभ्यः पौतिमाष्यायणाच्च कौण्डिन्यायनाच्च कौण्डिन्यायनः कौण्डिन्यात्कौण्डिन्यः कौण्डिन्यात्कौण्डिन्यः कौण्डिन्याच्चाग्निवेश्याच्च ॥ २ ॥ अग्निवेश्यः सैतवात् सैतवः पाराशर्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्चासुरायणाच्च गौतमाच्च गौतमो भारद्वाजाद् भारद्वाजो वैजवापायनाद्वैजवापायनः कौशिकायनेः कौशिकायनिर्घृतकौशिकाद्घृतकौशिकः पाराशर्य्यायणात्पाराशर्य्यायणः पाराशर्यात्पाराशर्य्यो जातूकर्ण्याज्जातूकर्ण्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्चासुरायणाच्च यास्काच्चासुरायणस्त्रैवणेस्त्रैवणिरौपजन्धनेरौपजन्धनिरासुरेरासुरिर्भारद्वाजाद्भारद्वाजऽआत्रेयात् ॥ ३ ॥ आत्रेयो माण्टेर्माण्टिर्गौतमाद्गौतमो गौतमाद् गौतमो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वात्स्याद्वात्स्यः शाण्डिल्याच्छाण्डिल्यः कैशोर्य्यात्काप्यात्कैशोर्य्यः काप्यः कुमारहारितात्कुमारहारितो गालवाद्गालवोविदर्भीकौण्डिन्याद्विदर्भीकौण्डिन्यो वत्सनपातो बाभ्रवाद्वत्सनपाद्बाभ्रवः पथः सौभरात्पन्थाः सौभरोऽयास्यादाङ्गिरसादयास्यऽआङ्गिरसऽआभूतेस्त्वाष्ट्रादाभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽशिवभ्यामश्विनौ दधीचऽआथर्वणाद्दध्यङ्ङाथर्वणो दैवादथर्व्वादैवो मृत्योः प्राध्व६· सनान्मृत्युः प्राध्व ६· सनः प्राध्व ६· सनात्प्राध्व ६· सनऽएकर्षे रेकर्षिर्व्विप्रजितेर्व्विप्रजितिर्व्यष्टेर्व्यष्टिः सनारोः सनारुः सनातनात्सनातनः सनगात्सनगः परमेष्ठिनः परमेष्ठी ब्रह्मणो ब्रह्म स्वयम्भुब्रह्मणे नमः ॥ ४ ॥ वंशोक्ता ऋषयस्तृप्यन्ताम् ॥ अथ व ६· शस्तदिदं वय ६· शौर्पणाय्याच्छौर्पणाय्यो गौतमाद्गौतमो वात्स्याद्वात्स्यो वात्स्याच्च पाराशर्याच्च पाराशर्यः साङ्कृत्याच्च भारद्वाजाच्च भारद्वाजऽऔदवाहेश्च शाण्डिल्याच्च शाण्डिल्यो वैजवापाच्च गौतमाच्च गौतमो वैजवापायनाच्च वैष्टपुरेयाच्च वैष्टपुरेयः शाण्डिल्याच्च रौहिणाय-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गोतमो वैजवापायनाच्च वैष्ठपुरेयाच्च वैष्ठपुरेयः शाण्डिल्याच्च रौहिणाय-

नाच्च रौहिणायनः शौनकाच्च जैवन्तायनाच्च रैभ्याच्च रैभ्यः पौतिमाष्याय णाच्च कौण्डिन्यायनाच्च कौण्डिन्यायनः कौण्डिन्याभ्यां कौण्डिन्याऽऔर्णवाभेभ्य ऽ और्णवाभाः कौण्डिन्यात्कौण्डिन्यः कौण्डिन्यात्कौण्डिन्यः कौण्डिन्याच्चाग्निवेश्याच्च ॥ ५ ॥ आग्निवेश्यः सैतवात्सैतवः पाराशर्यात् पाराशर्यो जातूकर्ण्याज्जातूकर्ण्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्चासुरायणाच्च गौतमाच्च गौतमो भारद्वाजाद्भारद्वाजो बलाकाकौशिकाद्बलाकाकौशिकः काषायणात्काषायणः सौकरायणात्सौकरायणस्त्रैवणेस्त्रैवणिरौपजन्धनेरौपजन्धनिः सायकायनात्सायकायनः कौशिकायनेः कौशिकायनिर्घृतकौशिकाद्घृतकौशिकः पाराशर्यायणात्पाराशर्य्यायणः पाराशर्यात्पाराशर्य्यो जातूकर्ण्याज्जातूकर्ण्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्चासुरायणाच्च यास्काच्चासुरायणस्त्रैवणेस्त्रैवणिरौपजन्धनेरौपजन्धनिरासुरेरासुरिर्भारद्वाजाद्भारद्वाजऽआत्रेयात् ॥ ६ ॥ आत्रेयादात्रेयोमाण्टेर्माण्टिर्गौतमाद्गौतमो गौतमाद्गौतमो वात्स्याद्वात्स्यः शाण्डिल्याच्छा-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ण्डिल्यः कैशोर्यात्काप्यात्कैशोर्यः काप्यः कुमारहारितात्कुमारहारितोगालवाद्गा-
लवो विदर्भीकौण्डिन्याद्विदर्भीकौण्डिन्यो वत्सनपातो बाभ्रवाद्वत्सनपाद्बाभ्रवः
पथः सौभरात्पन्था: सौभरो यास्यादाङ्गिरसादयास्यऽआङ्गिरसऽआभूतेस्त्वाष्ट्रादाभू-
तिस्त्वाष्ट्रोविश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौदधीच ऽ अथर्वणाद्द-
ध्यङ्ङाथर्वणो दैवादथर्वादैवो मृत्योः प्राध्व ६ सनान्मृत्युःप्राध्व ६ सनात् प्राध्व ६
सनऽएकर्षेरेकर्षिर्विप्रजितेर्विप्रजितिर्व्यष्टेर्व्यष्टिःसनारोः सनारुः सनातनात् सना-
तनः सनगात्सनगः परमेष्ठिनः परमेष्ठी ब्रह्मणो ब्रह्म स्वयम्भुब्रह्मणे नमः ॥ वंशोक्ता
ऋषयस्तृप्यन्ताम् ॥ ७ ॥ अथ व ६ शस्तदिदं वंशः भारद्वाजीपुत्राद्भारद्वाजी-
पुत्रो वात्सीमाण्डवीपुत्राद्वात्सीमाण्डवीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रो गार्गी-
पुत्राद्गार्गीपुत्रः पाराशरीकौण्डिनीपुत्रात्पाराशरीकौण्डिनीपुत्रो गार्गीपुत्राद्गार्गी-
पुत्रो गार्गीपुत्राद् गार्गीपुत्रो वाडेयीपुत्राद्वाडेयीपुत्रो मौषिकीपुत्रान्मौषिकीपुत्रो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नकीपुत्राच्छौनकीपुत्रः ॥ ८ ॥ काश्यपीबालाक्यामाठरीपुत्रात्काश्यपीबाला-
क्यामाठरीपुत्रः कौत्सीपुत्रात्कौत्सीपुत्रोबौधीपुत्राद्बौधीपुत्रः शालंकायनीपुत्रा-
च्छालंकायनीपुत्रो वार्षगणीपुत्राद्वार्षगणीपुत्रो गौतमीपुत्राद्गौतमीपुत्रऽआत्रेयीपुत्रा-
दात्रेयीपुत्रो गौतमीपुत्राद्गौतमीपुत्रोवात्सीपुत्राद्वात्सीपुत्रो भारद्वाजीपुत्राद् भार-
जीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रो वार्कारुणीपुत्राद्वार्कारुणीपुत्रऽआर्तभागी
पुत्रादार्तभागीपुत्रः शौङ्गीपुत्राच्छौङ्गीपुत्रः साङ्कृतीपुत्रात्साङ्कृतीपुत्रः ॥ ९ ॥
आलम्बीपुत्रादालम्बीपुत्रऽआलम्बायनीपुत्रादालम्बायनीपुत्रो जायन्तीपुत्राज्जाय-
न्तीपुत्रो माण्डूकायनीपुत्रान्माण्डूकायनीपुत्रो माण्डूकीपुत्रान्माण्डूकीपुत्रः शाण्डि-
लीपुत्राच्छाण्डिलीपुत्रो राथीतरीपुत्राद्राथीतरीपुत्रः क्रौञ्चिकीपुत्राभ्यां क्रौञ्चिकीपुत्रौ
वैदभृतीपुत्राद्वैदभृतीपुत्रो भालुकीपुत्राद्भालुकीपुत्रः प्राचीनयोगीपुत्रात् प्राचीनयो-
गीपुत्रःसाञ्जीवीपुत्रात्साञ्जीवीपुत्रः कार्शकेयीपुत्रात्कार्शकेयीपुत्रः ॥ १० ॥ प्राश्नी-
पुत्रादासुरिवासिनः।प्राश्नीपुत्रऽआसुरायणादासुरायणऽआसुरेरासुरिर्याज्ञवल्क्याद्या-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ज्ञवल्क्यऽउद्दालकादुद्दालकोऽरुणादरुण ऽ उपवेशेरुपवेशिः कुश्रेः कुश्रिर्वाजश्रवसो वाजश्रवाज्जिह्वावतो ब्बाध्योगाज्जिह्वावान्बाध्योगोसितादुवार्षगणादसितोव्वार्षगणो हरितात्कश्यपात् हरितः कश्यपः शिल्पात्कश्यपाच्छिल्पः कश्यपः कश्यपान्नैध्रुवेः कश्यपो नैध्रुविर्व्वाचोबागम्भिण्याऽअम्भिण्यादित्यादादित्यानीमानि शुक्लानि यजू छं षि वाजसनेयेन याज्ञवल्केनाख्यायन्ते ॥ ११ ॥ वंशोक्ता ऋषयस्तृप्यन्ताम् । चतुर्वारं गायत्रीं जपेत् । ततः सावित्र्याश्चतुःकृत्वाऽनुब्रुवणम् । सर्वेषां तदन्ते 'ॐ विरताः स्म' इति सकृदुच्चैर्ब्रूयात् ॥

ॐ चतुर्दशकाण्डेषु अध्यायोक्ता ऋषयस्तृप्यन्ताम् २। ॐ चतुर्दशकाण्डेषु शतोक्ता ऋषयस्तृप्यन्ताम् २। ॐ चतुर्दशकाण्डे प्रपाठोक्ता ऋषयस्तृप्यन्ताम् । ॐ अन्त्यकाण्डकोक्ता ऋषयस्तृप्यन्ताम् । ॐ चतुर्दशंकाण्डे अन्त्यफक्किकोक्ता ऋषयस्तृप्यन्ताम ॥ ॐ हिरण्मयेन पात्रेण सत्यस्यापिहितंमुखम् । योसावादित्ये पुरुषः सोसावहम् । ॐ खं ब्रह्म ३। ॐ अध्यायोक्ता ऋषयस्तृप्यन्ताम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ॐ अध्यायोक्ता ऋषयस्तृप्यन्ताम् ।

नमस्कारः—ततः तदेतदृचाभ्युक्तं न मृषा श्रान्तं यदवन्ति देवा इति नहैवैवं विदुषः किञ्चन मृषा श्रान्तं भवति तथो हास्यैतत्सर्वं देवाऽअवन्ति ॥ १ ॥ इति ॥

स्वस्वप्रवराणाम् विसर्जनम्— उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वे महे । उपप्रयन्तु मरुतः सुदानवऽइन्द्र प्राशूर्भवा सचा ॥इति॥ स्वस्वप्रवरान्विसर्जयेत् । ततो जले प्रास्यन्–समुद्रं गच्छस्वाहान्तरिक्षं गच्छस्वाहा देव ६- सवितारङ्गच्छ स्वाहा मित्रा-वरुणौ गच्छ स्वाहा ऽ होरात्रे गच्छ स्वाहा छन्दा ७ं सि गच्छ स्वाहा द्यावा-पृथिवी गच्छ स्वाहा यज्ञङ्गच्छ स्वाहा सोमं गच्छ स्वाहा दिव्यन्नभो गच्छ स्वाहाग्निं वैश्वानरङ्गच्छ स्वाहा मनो मेहार्दि यच्छ दिवन्ते धूमो गच्छतु स्वर्ज्योतिः पृथिवीम्भस्मना पृण स्वाहा ॥

ततो द्विराचम्य अर्पणम्—अनेन अध्यायोत्सर्गकर्माङ्गत्वेनकृतेन ऋषिपूजन-तर्पणादिकर्मणा श्रीभगवान् परमेश्वरः प्रीयताम् न मम ॥ ॐतत्सत् ब्रह्मार्पणमस्तु ॥

॥ इति श्रावणीप्रयोगः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ कृताकृतम् ऋषिश्राद्धम् (कृताकृतम्=गरे पनि नगरे पनि हुने)—कृतप्राणायामो देशकालौ संकीर्त्य, संकल्पः—उत्सर्गाङ्गभूतमृषिश्राद्धमहं करिष्ये ॥ ॐ इदं विष्णुर्वि० ॥ इति मन्त्रेण दिग्बन्धः । ऋषिश्राद्धस्योपहाराः शुचयो भवन्तु ॥ इत्युपहारप्रोक्षणम् । देशकालपात्रसम्पदस्तु ॥ अरुन्धतीसहित-कश्यपादिस्वऋषीणामिदमासनम् यथायथाविभागं वः स्वाहा । अरुन्धती-सहितकश्यपादिस्वऋषयः यथादत्तं गन्धाद्यर्चनं यथायथाविभागं वः स्वाहा ॥ इति गन्धादि-दानम् ॥ ऋषिश्राद्धसाङ्गतासिद्ध्यर्थं सप्तसंख्याकान् ब्राह्मणान् यथाकालं यथासम्पन्नान्नेन तर्पयिष्ये । तेन अरुन्धतीसहितकश्यपादि स्वऋषयः प्रीयन्ताम् ॥ ऋषिश्राद्धसांगतासिद्ध्यर्थं हिरण्यनिष्क्रयभूतां दक्षिणाम् आचार्याय तुभ्यमहं सम्प्रददे ॥ आचार्यः—ॐ को ऽदात् कस्मा ऽअदात् कामो ऽदात् कामायादात् । कामो दाता कामः प्रतिग्रहीता कामैतत्ते ॥ इति मन्त्रं पठेत् ॥ [illegible] ॐ [illegible]

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सन्तु । सौमनस्यमस्तु । अक्षतं चारिष्टमस्तु । अघोरा ऋषयः सन्तु । सर्वत्र 'सन्तु' इति प्रतिवचनम् विप्राः दद्युः ॥ उत्सर्गकर्मणो न्यूनातिरिक्तदोषपरिहारार्थं नानानामगोत्रेभ्यो ब्राह्मणेभ्यो भूयसीं दक्षिणां सम्प्रददे ॥ 'प्रार्थना'-उत्सर्गाङ्ग-भूतम् ऋषिश्राद्धम् परिपूर्णमस्तु । अस्तुपरिपूर्णमिति आचार्यादयः प्रतिवचनं दद्युः ॥ ततः सहनोऽस्तु, सहनोऽवतु सहन ऽ इदं वीर्यवदस्तु ब्रह्म ऽ इन्द्रस्तद्वद येन यथा न विद्विषामह इति ॥ पश्चात्--उभाकवी० इति मन्त्रं पठेत् ॥

इति ऋषिश्राद्धम् ॥

ततः स्वपितृभ्यो यज्ञोपवीतदानम्—

[प्रचीनावीती=(अपसव्य) दक्षिणाभिमुखाः सर्वे पितृका अपितृकाः कुशोदकं गृहीत्वा पुरतो यज्ञोपवीतानि निधाय] ···अमुकगोत्रेभ्यः अस्मत्पितृपितामहप्रपितामहेभ्यः । तथा द्वितीयम्-अमुकगोत्रेभ्यः अस्मत् मातामह-प्रमातामह-वृद्ध-प्रमातामहेभ्यः ॥ तृतीयम्-कव्यवाडनलादिदिव्यपितृभ्यः इमानि यज्ञोपवीतानि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वधा सम्पद्यन्ताम् ॥ इति ऋष्युपरि समर्पयेयुः ॥ ततः सव्यं कृत्वा ब्राह्मणं ब्राह्मणान् वा गन्धादिना सम्पूज्य तेभ्यो यज्ञोपवीतानि दत्त्वा पश्चात् सर्वैः स्वयमपि विधिवद् धार्याणि ॥

यज्ञोपवीतधारणविधिर्यथा–'नवीनयज्ञोपवीतधारणम्'–यज्ञोपवीतं गृहीत्वा सज्जीकृत्य–यज्ञोपवीतमितिमन्त्रस्य परमेष्ठी ऋषिः, लिङ्गोक्ता देवता, त्रिष्टुप् छन्दः, यज्ञोपवीतधारणे विनियोगः–ॐयज्ञोपवीतं परमं पवित्रम् प्रजापते-र्यत् सहजम् पुरस्तात् ॥ आयुष्यमग्र्यम्प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥ यज्ञोपवीतमसि यज्ञस्य त्वा यज्ञोपवीतेनोपनह्यामि ॥ अनेन मन्त्रेण यज्ञोपवीतानां पृथक् पृथक् धारणं कुर्यात् ॥ यज्ञोपवीतधारणस्याद्यन्तयोराचमनम् ॥ धारणान्ते 'जीर्णयज्ञोपवीतत्यागमन्त्रः'—एतावद्दिनपर्यन्तम् ब्रह्म त्वं धारितं मया । जीर्णत्वात् तत्परित्यागो गच्छ सूत्र ! यथासुखम् ॥ इति मन्त्रेण जीर्णयज्ञोपवीतं शिरोमार्गेण निःसार्य [illegible] यथाशक्ति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शिरोमार्गेण निःसार्य शुद्धभूमौ त्यजेत् ॥ पश्चाद् यथाशक्ति [illegible]
कुर्यात् ॥ 'अर्पणम्'—अनेन नवयज्ञोपवीतधारणार्थे कृतेन यथाशक्तिगायत्रीजपकर्मणा श्रीसविता देवता प्रीयतां न मम ॥ ॐ तत्सत् ब्रह्मार्पणमस्तु ॥

अथ रक्षा-बन्धनम्—

(नराणां दक्षिणनाड्याम्, नारीणां वामनाड्याम्)

येन बद्धो बली राजा दानवेन्द्रो महाबलः ।
तेन त्वां प्रतिबध्नामि रक्षे मा चल मा चल ॥

ततः आचार्यादिब्राह्मणपूजनं कृत्वा तेभ्यो दक्षिणां दत्त्वा ब्राह्मणाशिषो गृह्णीयात् ॥ श्रद्धा चेत्-ॐ तत्सत्…अद्येह…कृतस्योत्सर्गाख्यकर्मणः साङ्गतासिद्ध्यर्थं यथावकाशेन यथाशक्ति ब्राह्मणान् भोजयिष्ये, इति संकल्पयेत् ॥ यथावसरे भक्षयेच्च ॥

इति श्रावणी–पद्धतिः ॥

—:❀:—

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यज्ञोपवीतधारणे संख्या--

यज्ञोपवीते द्वे धार्ये एकं नैव च धारयेत् । तृतीयं चोत्तरीयं स्यात् वस्त्राभावे चतुर्थकम् ॥ विना यज्ञोपवीतेन तोयं यः पिबति द्विजः । उपवासेन चैकेन पञ्चगव्येन शुद्ध्यति ॥ विना यज्ञोपवीतेन विण्मूत्रोत्सर्गकृद् यदि । उपवासद्वयं कृत्वा दानैर्होमैस्तु शुद्ध्यति ॥ उपाकर्मणि चोत्सर्गे गते मास-चतुष्टये । नव-यज्ञोपवीतानि धृत्वा पूर्वाणि संत्यजेत् ॥ जीर्णयज्ञोपवीतानि शिरोमार्गेण संत्यजेदिति ॥ अन्यच्च-सूतके मृतके चैव गते मासचतुष्टये । नवयज्ञोपवीतानि धृत्वा जीर्णानि संत्यजेत् ॥

अन्यत्-दिने यज्ञोपवीतधारणप्रयोगः--

यज्ञोपवीतान्युदकेन प्रक्षाल्यानन्तरमाचम्य प्राणानायम्य ॥ 'संकल्पः'— अद्येत्यादि मम श्रौतस्मार्तकर्मानुष्ठानसिद्ध्यर्थं तथा च अमुककर्माङ्गत्वेन नवीन-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यज्ञोपवीतधारणमहं करिष्ये । (इति संकल्प्य यज्ञोपवीतानि करसम्पुटे दश गायत्रीमन्त्रैः अभिमन्त्रयेत् ॥ तदनन्तरम्) ॐ यज्ञोपवीतम् परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् । आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥ ॐ यज्ञोपवीतमसि यज्ञस्य त्वा यज्ञोपवीतेनोपनह्यामि ॥ इति मन्त्रौ पठित्वा पृथक् पृथक् यज्ञोपवीतानि दक्षिणहस्तद्वारा धार्याणि ॥ (प्रतियज्ञोपवीतधारणान्ते आचम्य) पश्चात् यथाशक्ति गायत्रीर्जपेत् ॥ (ततो जीर्णयज्ञोपवीतत्यागः कार्यः) 'अर्पणम्'–अनेन नवयज्ञोपवीतधारणार्थे कृतेन यथाशक्ति गायत्रीजपाख्येन कर्मणा श्रीसूर्यनारायणः प्रीयतां न मम ॥ ॐ तत्सत् ब्रह्मार्पणमस्तु ॥

॥ इति अन्यद्दिनयज्ञोपवीतधारणप्रयोगः ॥

—:※:—

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ उपाकर्मप्रयोगः--

गुरुः हस्तौ पादौ प्रक्षाल्य द्विराचम्याऽऽवसथ्याग्नेर्लौकिकाग्नेर्वा पश्चाच्छिष्यैः सह प्राङ्मुख उपविश्य प्राणायामत्रयं कृत्वा देशकालौ संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थम् अध्यायोपाकर्मणि पञ्चभूसंस्कारपूर्वकमग्निस्थापनमहं करिष्ये इति संकल्प्य पञ्चभूसंस्कारान् कुर्यात् । (ते च – १ – दर्भैः परिसमूह्य । २ – गोमयोदकेनोपलिप्य । ३ – स्रुवेणोल्लिख्य । ४ – अनामिकाङ्गुष्ठाभ्यामुद्धृत्य । ५ – उदकेनाभ्युक्ष्य ॥ ततः अग्निं प्रतिष्ठाप्य पात्रस्थापनादि कुर्यात् । तत्र पूर्वेण ब्रह्मणो गमनम् । अग्नेरुत्तरतः पात्रासादनम् । द्वे पवित्रे, ताम्रमयी आज्यस्थाली । पालाश्यः समिधः । प्राञ्चावाघारौ । समिद्धतमे आज्यभागौ । तिलहोमः सावित्रीमन्त्रेण । पूर्णपात्रम्, दक्षिणा । त्रिरात्रं लोमनखानामनिकृन्तनम् ॥) "ऋषिच्छन्ददेवतास्मरणम्"–इषेत्वा० इत्यादिकस्य खम्ब्रह्मान्तस्य माध्यन्दिनीयस्य वाजसनेयकस्य यजुर्वेदाम्नायस्य विवस्वानृषिः । वायुर्देवता ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गायत्र्यादीनि सर्वाणि छन्दांसि । अध्यायोपाकर्मणि विनियोगः-'देवताभि-
ध्यानम्'-तत्र - प्रजापतिम्, इन्द्रम्, अग्निम्, सोमम्, पृथिवीम्, अग्निम्,
ब्रह्माणम्, छन्दांसि, अन्तरिक्षम्, वायुम्, ब्रह्माणम्, छन्दांसि, दिवम्, सूर्यम्,
ब्रह्माणम्, छन्दांसि, दिशः, चन्द्रमसम्, ब्रह्माणम्, छन्दांसि, प्रजापतिम्,
देवान्, ऋषीन्, श्रद्धाम्, मेधाम्, सदसस्पतिम्, अनुमतिम् । एताः प्रधा-
नदेवता आज्येन । सदसस्पतिम् धानाभिः । सवितारम् तिलैः । अग्निं
स्विष्टकृतं धानाशेषेण । अग्निम्, वायुम्, सूर्यम्, अग्नीवरुणौ, अग्नीवरुणौ,
अग्निम्, वरुणम्, सवितारम्, विष्णुम्, विश्वान् देवान्, मरुतः, स्वर्कान्,
वरुणम्, प्रजापतिम् । एता अङ्गप्रधानार्था देवता अस्मिन् कर्मण्यहं यक्ष्ये ॥
[ब्रह्मवरणम् (दक्षिणतो ब्रह्मासनमास्तीर्य । अमुकशर्मन् अस्मिन् कर्मणि,
त्वं 'ब्रह्मा भव' । 'भवामि' इति प्रतिवचनम् । ब्रह्मा तूष्णीम् आसनावलो-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कनम् आसनाचॄणनिरसनञ्च कृत्वा उपविशेत्) । अग्नेरुत्तरतः प्रणीतार्थमामनद्वयं निधाय । प्रणीता चमसं वामहस्ते कृत्वा आत्माभिमुखं जलेनापूर्य प्रथमासने निधाय चमसदण्डमालभ्य ब्रह्माणमवलोक्य तेन संकेतादिना ऽनुज्ञातः प्रणीयोत्तरासने निदध्यात् । तत उदगग्रैः प्रागग्रैः कुशैरग्निं परिस्तीर्य । अर्थवदासाद्य । अग्नेरुत्तरतः प्राक्संस्थमुदक्संस्थं वा पात्रासादनम् । पवित्रच्छेदनार्थं दर्भास्त्रयः । पवित्रे द्वे । प्रोक्षणीपात्रम् । आज्यस्थाली । सम्मार्जनकुशास्त्रिप्रभृतयः । उपयमनकुशाः सप्तप्रभृतयः । समिधस्त्रिप्रभृतयः । स्रुवः । आज्यम्, धानाः, पूर्णपात्रम् च ॥

अथोपकल्पनीयानि--

प्रतिशिष्यं नव नव समिध आर्द्राः सपत्रा औदुम्बरस्य । दधि भक्षणार्थम् । लौकिका धानाः ... तिलस्थापनस्थाने सर्व-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मुद्रणार्थम् । लौकिका धाना बाहुमात्रमौदुम्बरकाष्ठम् तिलस्थापनस्थाने सर्प-फणाकारमाकर्षफलकम्[१] । तिलाश्चेति । पवित्रकरणम् । द्वयोरुपरि त्रीणि निधाय द्विमूलेन द्वौ कुशौ प्रदक्षिणीकृत्य सर्वान्युगपद्धृत्वा ऽनामिकाऽङ्गुष्ठाभ्यां छित्वा तानुत्तरतः प्रक्षिपेत् । प्रोक्षणीपात्रं प्रणीतोत्तरतो निधाय । प्रोक्षणीपात्रे पात्रान्तरेण प्रणीताद्भिस्तासां प्रोक्षणम् । सपवित्रहस्तेनोत्तानेन पात्रप्रोक्षणम् । आज्यस्थाल्याः प्रोक्षणम् । संमार्जनकुशानां प्रोक्षणम् । उपयमनकुशानां प्रोक्षणम् । समिधां प्रोक्षणम् । स्रुवस्य प्रोक्षणम् । आज्यस्य प्रोक्षणम् । धानानां प्रोक्षणम् । पूर्णपात्रस्य प्रोक्षणम् ॥ प्रणीताग्न्योर्मध्ये असञ्चरे प्रोक्षणीं निधाय । कुशोपग्रहेण आज्यस्थाल्यामाज्यनिर्वापः । आज्याधिश्रयणम् । ततो ज्वलदुल्मुकेन पर्यग्निकरणम् । इतरथावृत्तिः । अर्धश्रिते

१––औदुम्बरस्य या शाखा फलक – द्वयसंयुता ।

आकर्षफलकं नाम याज्ञिकैः परिकल्पितम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्रुवं प्रतप्य । संमार्जनकुशैः संमृज्य । अग्रमूलादारभ्याग्रपर्यन्तं, मूलैरग्रादारभ्य मूलपर्यन्तम् प्रणीतोदकेनाभ्युक्ष्य । पुनः प्रतप्य दक्षिणतो निदध्यात् । आज्यमुद्वास्य उत्तरतो निधाय । ततोऽग्नेः पश्चिमतो निदध्यात् । पवित्राभ्यामाज्यमुत्पूय, प्रोक्षणीश्च पूर्ववदुत्पूय, आज्यमवेक्ष्य अपद्रव्यनिरसनम् । उपयमनकुशानादाय, तिष्ठन् समिधो ऽभ्याधाय प्रोक्षण्युदकशेषेण सपवित्रेण हस्तेन ईशानम् आरभ्य ईशानपर्यन्तम् प्रदक्षिणमग्निं पर्युक्ष्य । इतरथावृत्तिः । पवित्रयोः प्रणीतासु निधानम् । सोपग्रहं सव्यहस्तम् उत्तानं हृदि निधाय दक्षिणजानुनिपातः ब्रह्मणोन्वारम्भः । दक्षिणहस्तेन स्रुवेण होमः ।] मनसा—ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम (त्यागान्ते द्रव्यप्रक्षेपः । प्रोक्षणीपात्रे संस्रवधारणम्) ॐ इन्द्राय स्वाहा इदम् इन्द्राय न मम ॥ ॐ अग्नये स्वाहा इदमग्नये न मम ॥ ॐ सोमाय स्वाहा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अग्नये स्वाहा इदमग्नये न मम ॥ ॐ सोमाय स्वाहा

इदं सोमाय न मम ॥ १-ऋग्वेदे-'सप्त[1]विंशत्याहुतयः' ॥ ॐ पृथिव्यै
स्वाहा इदं पृथिव्यै न मम । ॐ अग्नये स्वाहा इदमग्नये न मम । ॐ
ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम । ॐ छन्दोभ्यः स्वाहा इदम् छन्दोभ्यो
न मम ॥ २ - यजुर्वेदे—ॐ अन्तरिक्षाय स्वाहा इदम् अन्तरिक्षाय
न मम । ॐ वायवे स्वाहा इदम् वायवे न मम । ॐ ब्रह्मणे स्वाहा इदं
ब्रह्मणे न मम । ॐ छन्दोभ्यः स्वाहा इदम् छन्दोभ्यो न मम ॥ ३. -
सामवेदे—ॐ दिवे स्वाहा इदं दिवे न मम । ॐ सूर्याय स्वाहा इदं
सूर्याय न मम । ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम । ॐ
छन्दोभ्यः स्वाहा इदं छन्दोभ्यो न मम । ४. - अथर्ववेदे—ॐ दिग्भ्यः

---

१. — एताः सप्तविंशत्याहुतयः आज्येन ततः प्रोक्षितधानाभिघारणम् ।
स्रुवेण धाना अवदाय सदसस्पतिमद्भुतमित्यनेन मन्त्रेण जुहुयात् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वाहा इदम् दिग्भ्यो न मम । ॐ चन्द्रमसे स्वाहा इदं चन्द्रमसे न मम । ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम । ॐ छन्दोभ्यः स्वाहा इदं छन्दोभ्यो न मम । ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम । ॐ देवेभ्यः स्वाहा इदं देवेभ्यो न मम । ॐ ऋषिभ्यः स्वाहा इदम् ऋषिभ्यो न मम । ॐ श्रद्धायै स्वाहा इदम् श्रद्धायै न मम । ॐ मेधायै स्वाहा इदम् मेधायै न मम । ॐ सदसस्पतये स्वाहा इदं सदसस्पतये न मम । ॐ अनुमतये स्वाहा इदम् अनुमतये न मम । ॐ सदसस्पतिमद्भुतम्प्रियमिन्द्रस्य काम्यम् । सनिम्मेधा मयासिष ठं स्वाहा ॥ १ ॥ इदं सदसस्पतये न मम । इमं मन्त्रं गुरुणा पठ्यमानं शिष्या अपि सहानुपठेयुः । (तत उदुम्बर-समित्त्रितयमभिघार्य हस्ते गृहीत्वा उत्थाय प्राङ्मुखास्तिष्ठन्तः) । ॐ तत्सवितुर्वरेण्यम्० ॥ स्वाहा इदमग्नये न मम । (इत्युच्चार्य एकां समिधमादध्युः । एवं मन्त्रेण

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वाहा इदमग्नये न मम । (इत्युच्चार्य एकां समिधमादध्युः । एवं मन्त्रेण

द्वितीयां तथा तृतीयाम् । ततः सर्वे उपविशेयुः । आचार्यः पुनः स्रुवेण धाना
अवदाय) द्वितीयां धानाहुतिं पूर्ववत्-ॐ तत्सवितु० ॥ स्वाहा इदमग्नये
न मम ॥ ततस्तिस्रो ऽ पराः समिधो घृतेनाऽभ्युदय । उत्थाय प्राङ्मुखास्ति-
ष्ठन्तः--ॐ तत्सवितुः० ॥ स्वाहा इदमग्नये न मम ॥ (इत्युच्चार्य
एकां समिधमादध्युः) ॥ पुनः ॐ तत्सवितु० ॥ स्वाहा इदमग्नये न मम ॥
एवं द्वितीया । पुनः ॐ तत्सवितु० ॥ स्वाहा इदमग्नये न मम ॥ एवं
तृतीयां हुत्वाऽऽचार्यो धानाहुतिं जुहुयात् ॥ ॐ सदसस्पत० ॥ स्वाहा इदं
सदसस्पतये न मम ॥ मन्त्रानुपठनम् (शिष्याणामपि—समित्त्रयं पूर्ववत्
जुहुयात्) ॐ तत्सवितु० ॥ स्वाहा इदमग्नये न मम ॥ (एवं द्विती-
याम् तथा तृतीयाम् । ब्रह्मचारी तु । शिष्योऽहरहरग्निकार्यक्रमेण समि-
दाधानं कुर्यात् न सावित्र्या । अन्यत्सर्वं समानम्) धानाभक्षणम्-(ततो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

या उपकल्पिता धानास्तिस्रस्तिस्रो गृहीत्वा)-ॐ शन्नो भवन्तु व्वाजिनो हवेषु देवताता मितद्रवः स्वर्क्काः। जम्भयन्तो हिं व्वृक ᳪ रक्षा ᳪ सि सनेम्म्यस्म्म द्युयवन्नमीवाः ॥ (इति मन्त्रेण दन्तैरखादन्तः प्राश्नीयुः ॥ ततो द्विराचमनम्) 'दधिभक्षणम्'-ॐ दधिक्क्राव्णो ऽ अकारिषञ्जिष्णोरश्वस्यव्वाजिनः। सुरभि नो मुखाकरत् प्रण ऽ आयु ᳪ षि तारिषत् ॥ (इति मन्त्रेण दधि भक्षयेयुः) द्विराचमनम्--(तत आचार्यो यावन्तं शिष्यगणम् आत्मन इच्छेत्तावन्तस्तिलान् गणयित्वा आकर्षफलकेनावदाय) ॥ ॐ शुक्रज्ज्योतिश्च चित्रज्ज्योतिश्च सत्यज्ज्योतिश्च ज्योतिष्माँश्च। शुक्रश्च ऽ ऋतपाश्चात्य ᳪ हाः ॥ इत्याद्यनुवाकेन सावित्र्या वा जुहुयात् ॥ ॐ तत्सवितु० ॥ स्वाहा इदं सवित्रे न मम ॥ (संस्रवप्रक्षेपः। ततो धानाभ्यः स्विष्टकृत्)-ॐ अग्नये स्विष्टकृते स्वाहा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इदमग्नये स्विष्टकृते न मम ॥ 'भूराद्या नवाहुतयः'–(आज्येन जुहुयात् । सर्वत्र त्यागान्ते द्रव्यप्रक्षेपः ।) तद्यथा—१. ॐ भूः स्वाहा इदमग्नये न मम ॥ २. ॐ भुवः स्वाहा इदं वायवे न मम ॥ ३. ॐ स्वः स्वाहा इदं सूर्याय न मम ॥ ॐ त्वन्नो ऽ अग्ने व्वरुणस्य व्विद्वान्देवस्य हेडो ऽ अवयासिसीष्ठाः । यजिष्ठो व्वह्नितमः शोशुचानो व्विश्वा द्वेषाᳬसि प्रमुमुग्ध्यस्मत् स्वाहा ॥ इदमग्नीवरुणाभ्यां न मम ॥ स त्वन्नो ऽ अग्ने ऽ वमो भवो तो नेदिष्ठो ऽ अस्या ऽ उषसो व्व्युष्टौ । अवयक्ष्व नो व्वरुण ᳪ रराणो व्वीहि मृडीक ᳪ सुहवो न ऽ एधि स्वाहा ॥ इदमग्निवरुणाभ्यां न मम ॥ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्वमया ऽ असि । अया नो यज्ञं वहास्यया नोधेहि भेषज ᳪ स्वाहा । (सौत्रमन्त्रः) इदमयाय न मम । इदमग्नये अयसे न मम इति) केचित् ॥ ये ते शतं वरुणं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ये सहस्रं यज्ञियाः पाशा वितता महान्तः । तेभिर्नो ऽ द्यसवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्क्काः स्वाहा ॥ (सौत्रमन्त्रः) इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्क्केभ्यश्च न मम ॥ ॐ उदुत्तमम्वरुण पाशमस्मदवाधमं विमद्ध्यम ᳪ श्रथाय । अथा व्वयमादित्य व्रते तवानागसो ऽ अदितये स्याम स्वाहा ॥ इदमादित्यायादितये न मम ॥ (उपांशु) ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम ॥ (संस्रवप्राशनम्) ॥ आचमनम्–(पवित्राभ्यां मार्जनम् । अग्नौ पवित्रप्रतिपत्तिः) 'ब्रह्मणे पूर्णपात्रदानम्–तद्यथा–ब्रह्मन् अस्योपाकर्मणो ऽ कृतया विहितं पूर्णपात्रं प्रतिगृह्यताम् ॥ ॐ द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु इति मन्त्रस्य ब्रह्मा जपं कुर्यात् ॥ (प्रणीताविमोकः । ततोऽग्निमुत्तरेण कुशेषु प्रत्यङ्मुखोपविष्टेभ्यः शिष्येभ्यः प्राङ्मुख आचार्य ओङ्कारमुक्त्वा त्रिश्च सावि-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्रीमनुब्रूयात्) यथा--ॐ तत्सवि० दयात् ॥ (इति त्रिः) इषेत्वादि ईशावास्यान्तम् ॥ व्रतमुपैष्यन्नित्यादि सर्वमन्त्रब्राह्मणयोरध्यायादि प्रब्रूयात् ॥ बह्वृचाम् ऋषिमुखानि । पर्वाणि छन्दोगानाम् । सूक्तान्यथर्वणानाम् ॥ (एवं सर्वं पठित्वा गुरुः शिष्याश्च जपन्ति) ॐ सहनोऽस्तु सहनोऽवतु सहन ऽ इदं वीर्यवदस्तु ब्रह्म इन्द्रस्तद्वेद येन यथा न विद्विषामहे ॥ (इति मन्त्रं जपित्वा त्रिरात्रमनध्ययनं लोम-नखानामनिकृन्तनमवपनं च करिष्यामहे ॥ इति सर्वेषां संकल्पः) प्रागुत्सर्गाद्वा नियमो लोम-नख-निकृन्तनम् । उत्सर्गविधि लोम-नखानामकृन्तनमहं करिष्ये इति ॥ छन्द-सामुत्सर्गात्प्राङ्मन्त्रब्राह्मणयोरनध्ययनम् ॥

॥ इति उपाकर्मप्रयोगः ॥

❀ समाप्तेयं पद्धतिः ❀

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यज्ञोपवीत–लक्षणम्—

त्रिवृदूर्ध्वं वृतं कार्यं तन्तुत्रयमधोवृतम् । त्रिवृतं चोपवीतं स्यात् तस्यैको ग्रन्थिरिष्यते ॥ वमावर्तं त्रिगुणं कृत्वा प्रदक्षिणावर्तं नवगुणं विधाय तदेवं त्रिशरं कृत्वा ग्रन्थिमेकं दिध्यात् । तथा–पृष्ठवंशे च नाभ्यां च धृतं यद्विन्दते कटिम् । तद्धार्यमुपवीतं स्यान्नातिलम्बं न चोच्छ्रितम् ॥ वामस्कन्धे कृतं नाभिहृत्पृष्ठवंशयोर्धृतम् । (कटिपर्यन्तमाप्नोति तावत्परिमाणकं कर्तव्यमित्यर्थः) ॥ कार्पासक्षौमगोवालशाणवल्कतृणादिकम् । सदा सम्भवतो धार्यमुपवीतं द्विजातिभिः ॥ शुचौ देशे शुचिः सूत्रं संहितांगुलिमूलके । आवेष्ट्य षण्णवत्या तत् त्रिगुणीकृत्य यत्नतः ॥ अब्लिङ्गकैस्त्रिभिः सम्यक् प्रक्षाल्योर्ध्ववृतं तु तत् । अप्रदक्षिणमावृत्तं सावित्र्या त्रिगुणीकृतम् । अधः प्रदक्षिणावृत्तं समं स्यात् नवसूत्रकम् । त्रिरावेष्ट्य दृढं बध्वा हरिब्रह्मेश्वरान् नमन् ॥ विच्छिन्नं वाऽ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्यधोप्यातं भुक्त्वा निर्मितमुत्सृजेत् । स्तनादूर्ध्वमधो नाभेर्नधार्यः तत्कथंचन ॥
ब्रह्मचारिण एकं स्यात् स्नातस्य द्वे बहूनि च ॥ तृतीयमुत्तरीयं वा वस्त्रा-
भावे तदिष्यते । ब्रह्मसूत्रे ऽत्र सव्यें ऽसे स्थिते यज्ञोपवीतिता । प्राचीना-
वीतिता ऽसव्ये कण्ठसंस्थे निवीतिता ॥

❀ इति ❀

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सकली, शुद्ध धार्मिक पुस्तक हरू पाइने ठेगाना–

गोर्खा पुस्तक एजेन्सी

जंगमबाड़ी, वाराणसी।

बृजकुमार प्रेस, मध्यमेश्वर वाराणसी।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥ इति ॥

श्रावणी विधि

[ऋषि तर्पणी नेपाली टीका समेत]

❀ समाप्त ❀

प्रकाशक

गोर्खा पुस्तक एजेन्सी

जंगमबाड़ी, वाराणसी

[सन १९७४ ई०]

CC-0. Nepal Sanskrit Academy, Kathmandu Collection